PART II

CHAPTER 6

CHAPTER

6·1

विषयाणामनुक्रमणिका

आचाराध्यायः

	विषयः	उद्धरण क्रमांक	पृ.सं.
१	उपोद्घातप्रकरणम्		१ - ३
	प्रमाणानि	३ - ४	
	धर्मशास्त्रप्रणेतारः	५	
	धर्मशास्त्रस्य महत्त्वम्	६ - ८	
	धर्मलक्षणानि	९ - १०	
	श्रुतिविरोधे प्रमाणम्	११ - १२	
	पर्षत्	१३ - १४	
२	ब्रह्मचारिप्रकरणम्		४ - २४
	ब्राह्मणस्याधिकारः	१५ - १६	
	ब्राह्मणः सर्वमर्हति	१७	
	संस्काराः	१८	
	रजस्वलाशुद्धिः	१९ - २१	
	गर्भाधानम्	२२ - २६	
	सीमन्तोन्नयनम्	२७ - २८	
	जातकर्म	२९ - ३२	
	नामकर्म	३३ - ३७	
	निष्क्रमणम्	३८ - ३९	

कर्णवेधः	४०
अन्नप्राशनम्	४१-४२
चूडाकरणम्	४३-४५
उपनयनम्	४६
ब्राह्मणादीमुपनयनवर्षाणि	४७-५१
द्वादशपुत्राः संस्कार्याः	५२
असंस्कार्याः	५३
शूद्रस्योपनयनम्	५४
उपनयनकालाः	५५
वासांसि	५६
उत्तरीयाणि	५७
दण्डाः	५८-६०
मौञ्जी	६१-६२
गुरुधर्माः	६३
व्रतचर्या	६४
अभिवादनम्	६५-६६

भैक्षचर्या	६७
कमण्डलुधारणम्	६८
ब्रह्मचारिवर्ज्याणि	६९
पवित्रलक्षणम्	७०
उपाध्यायलक्षणम्	७१
गुरुपूजनमहिमा	७२
गुरूणां सम्माननम्	७३ - ७७
वेदाध्ययनश्रेष्ठ्यम्	७८
अनध्यायाः	७९ - ९९
समावर्तनसमयः	१००
स्नातकधर्माः	१०१ - १२०

३ विवाहप्रकरणम् २४(अ) - ४१

वर्णक्रमेण भार्याः	१२१ - १२३
अनुलोमप्रतिलोमजा-वर्णाः तेषां कर्माणि	१२४ - १२६
सगोत्रो वर्ज्यः	१२७ -
शूद्रानिषेधः	१२८ - १३१
ब्राह्मविवाहलक्षणम्	१३२
आर्षविवाहलक्षणम्	१३३
प्राजापत्यविवाहलक्षणम्	१३४

असमानार्षगोत्रजां परिणयेत् १३५-१३८

वर्णक्रमेण कन्यायाः हस्तादिग्रहणम् १३९

गृहस्थधर्माः १४०-१५५

स्त्रीधर्माः १५६-१६७

अधिवेदनम् १६८-१७०

पुनर्भूस्वैरिण्यादयः १७१-१७२

वर्णजातिविवेकः तेषां कर्माणि १७३-१७५

वर्णजातिवृत्तयः १७६-१८२

४ आह्निकप्रकरणम् ४३-८४

प्रबोधः १८३

मूत्रपुरीषोत्सर्गक्रिया १८४-१९७

आचमनविधिः १९८-२२१

दन्तधावनम् २२२-२२४

स्नानविधिः २२५-२४७

मार्जनम् २४८-

प्राणायामलक्षणम् २४९-२५३

प्राणायामान्ते मार्जनम् २५४

अर्घ्यप्रदानम् २५५

जपविधिः २५६-२६४

संध्या २६५-२६६

संध्यालोपे प्रायश्चित्तम् २६७
सर्ववेदपवित्राणि २६८-२७०
जपमाला, पूजा २७१-२७८
तर्पणम् २७९-३०७
पञ्चमहायज्ञाः ३०८-३२१
भोजनविधिः ३२२-३४९
भोजनोत्तरं पुराणश्रवणम् ३५०-३५३
शयनम् ३५४-३५४

५ शुद्धिप्रकरणम् ४५-९२

स्वभावशुद्धानि ३५५-३६५
शरीरशुद्धिः ३६६-३६७
पात्राणां शुद्धिः ३६८-३७५
यज्ञपात्रादीनां शुद्धिः ३७६-३७७
मृण्मयपात्रादीनां शुद्धिः ३७८
शुचिद्रव्याणि ३७९-३८१
रजस्वलास्पर्शे शुद्धिः ३८२-
उदकशुद्धिः, वायुशुद्धिः ३८३-३८५
देशशुद्धिः ३८६-३८८
चेलादिशुद्धिः ३८९-३९२
चर्मशुद्धिः ३९३

प्रोक्षणेन शुद्धिः ३९४-३९५

स्नेहादीनां शुद्धिः ३९६

अशुध्द्यपवादः ३९७-४०५

६ दानप्रकरणम् ४०६-४०९ ९३-

७ श्राद्धप्रकरणम् ९४-१३७

श्राद्धाधिकारिणः ४१०-४१६

श्राद्धकालाः ४१७-४२५

श्राद्धदेशाः ४२६-४४०

अहरहः श्राद्धम् ४४१

मातृश्राद्धम् ४४२-४४३

आमश्राद्धम् ४४४-४४५

पार्वणो विधिः ४४६

पार्वणैकोद्दिष्टविधानम् ४४७-४५०

वृद्धिश्राद्धम् ४५१-४५२

ब्राह्मणामन्त्रणम् ४५३

अग्नौकरणम् ४५४-४५५

ब्राह्मणाः पङ्क्तिपावनाः ४५६-४६०

अपाङ्क्त्याः ४६१-४६५

श्राद्धं न दातव्यं ४६६

आसुरश्राद्धम् ४६७

पितृस्थाने नियोजनम् ४६८
एकब्राह्मणपक्षे दैवव्यवस्था ४६९-४७१
पवित्रलक्षणम् ४७२-४७४
ब्राह्मणप्रार्थना ४७५-४७६
भोजननियमाः ४७७-५०३
श्राद्धभोजने विहितानि ५०४-५१०
श्राद्धभोजने निषिद्धानि ५११-५२४
पिण्डदानक्रिया ५२५-५३०
पिण्डनैवेद्यम् ५३१
ब्राह्मणविसर्जनम् ५३२-५३५
सपिण्डीकरणम् ५३६-५४५
श्राद्धफलम् ५४६
श्राद्धे नियमाः ५४७-५५५

व्यवहाराध्यायः

८ राजधर्मप्रकरणम् ३३८-३२४
राज्ञः आवश्यकता ५५६
राज्ञो गुणाः ५५७
राजधर्माः ५५८
आफलोदयं मन्त्रगुप्तिः ५५९-५७६
राज्ञोऽदण्ड्याः ५७७-५७८

राज्ञो दण्ड्याः ५७९-५८२
दण्डप्रमाणम् ५८३-
प्रमाणबलाबलविचारः ५८४

९ साक्षिप्रकरणम् ३२५-३२७

कूटसाक्षिणः ५८५
साक्षिणः ५८६-५८७
असाक्षिणः ५८८-५९१
साक्षिद्वैधे निर्णयः ५९२

१० दिव्यप्रकरणम् ३२८-३२९

दिव्यप्रकाराः ५९३-५९५
उदकदिव्यम् ५९६-५९७
लोहधारणदिव्यम् ५९८
शपथविधिः ५९९-६००

११ संभूयसमुत्थानप्रकरणम् ६०१-६०३ ३२९-३३०

१२ स्वामिपालविवादप्रकरणम् ३३१-
गवादिभिः परसस्यादिभक्षणे दण्डः ६०४-६०५
अदण्ड्याः पशवः ६०६-६०७
वृत्तिकरणप्रकाराः ६०८

३३	सीमाविवादप्रकरणम्		१३२
	सीमाभेदे दण्डः	६०९-६११	
	क्षेत्रादिषु विसर्गमर्यादा	६१२	
३४	स्वामिविक्रयप्रकरणम्		१३३
	अस्वामिविक्रयः	६१३	
३५	दत्तप्रदानिकप्रकरणम्	६१४	१३३
३६	वाक्पारुष्यप्रकरणम्	६१५-६१७	१३४
३७	दण्डपारुष्यप्रकरणम्	६१८	१३४
३८	स्तेयप्रकरणम्		१३५-१३७
	कूटशासनप्रयोगेषु दण्डः	६१९	
	स्तेनस्य राजनि किल्बिषप्रमार्जनम्	६२०	
	सुवर्णरत्नापहरणादिषु दण्डः	६२१-६२४	
	राजपुत्रापहारादिषु दण्डः	६२५	
	हस्त्यश्वादिहरणे दण्डः	६२६-६२८	
	अब्राह्मणेन ब्राह्मणस्य सम्पदादिहरणे दण्डः	६२९	
	पथिकानां न दोषः	६३०-६३१	

१९ साहसप्रकरणम् ३३८-३३९
साहसलक्षणम् ६३१
साहसप्रकाराः ६३३
पुत्रादित्यागे दण्डः ६३४
मातापित्राद्यतिक्रमे दण्डः ६३५
प्रतिमारामादिभङ्गे दण्डः ६३६
रुधिरस्रावे दण्डः ६३७
साहसविशेषे दण्डः ६३८-६४१

२० स्त्रीसङ्ग्रहप्रकरणम् ३४०
कन्यादूषणम् ६४२-६४७

२१ दायभागप्रकरणम् ३४१-३४९
पुत्रप्रशंसा ६४८-६५५
दायादा अदायादाश्च ६५६-६५७
दायभागकालाः ६५८-६६२
एकपुत्रविभागः ६६३ -
औरसक्षेत्रजपुत्रिका - पुत्रयोर्विभागः ६६४
भूमिभागः ६६५
वर्णान्तरजातानां दायभागः ६६६
कन्यांशः ६६७-६६८
शूद्रापुत्रभागः ६६९

अविभजनीयाः	६७०
अपुत्रभ्रातृविभागः	६७१-६७२
पुत्राभावे विभागः	६७३-६७४
पूर्वाभावे परस्परदायग्रहणम्	६७५
अरिक्थभाजः	६७६
श्रेयसोऽलाभे दायभागिनः	६७७
देशान्तरगतोऽपि पुत्रोऽधिकारी	६७८
संसृष्टानां भागः	६७९
अपुत्रस्य दायभागिनः	६८०
भ्रातृभार्यास्नुषादीनां पिण्डदाने ऽधिकारः	६८१
प्रेतकार्याण्यकृत्वा धनं न हार्यम्	६८२
पुत्रिकायाः द्रव्याधिकारी न भर्ता	६८३
मातृकरिक्थाधिकारः	६८४-६८५
स्त्रीधनाधिकारिणः	६८६
अपात्रस्य न दायभागः	६८७
आमयत्रस्तानां सुताः भागहारिणः	६८८
अपुत्रधनविभागः	६८९-६९०

प्रायश्चित्ताध्यायः

२२	आशौचप्रकरणम्	६९१
	क्रिया पुत्रेण कार्या	६९२
	उदकदानादिकम्	६९३-६९७
	दशाहादर्वाग्बालाशौचम्	६९८-७०१
	बालाशौचम्	७०२-७०८
	सापिण्ड्यनिर्णयः	७०९
	सपिण्डानामाशौचम्	७१०
	मातामहादिमरणाशौचम्	७११-७१२
	अनौरसपुत्रादिमृतेष्वाशौचम्	७१३-७१४
	ऊढायाः कन्याया आशौचम्	७१५
	अनूढायां मृतायामाशौचम्	७१६
	बान्धवानामाशौचम्	७१७-७१८
	दशाहादूर्ध्वमाशौचम्	७१९
	गर्भस्रावाशौचम्	७२०
	शूद्रादीनामाशौचम्	७२१
	वर्णानुलोम्येनाशौचम्	७२२
	ब्रह्मचारिणामाशौचम्	७२३
	हीनवर्णायाः प्रसवे	७२४
	मरणे चाशौचम्	७
	शस्त्रादिभिः प्रमापणे आशौचम्	७२५-७२८
	अतिक्रान्ताशौचम्	७२९-७३२

	आशौचसन्निपाते	१३४-१३५	
	देशान्तरमरणे	१३६-१३७	
	अन्यपूर्वभार्यादीनां नाशौचम्	१३८-१३९	
	राजादीनां नाशौचम्	१४०-१४३	
	त्रिषु पिण्डाः	१४४-	
	प्रेतालङ्करणे असपिण्डस्य प्रायश्चित्तम्	१४५	
	आशौचे पुत्रजन्मनि तात्कालिकी शुद्धिः	१४६-१४७	
	अग्निहोत्रार्थं सद्यः शौचम्	१४८-१४९	
	आशौचे वर्ज्यम्	१५०	
२३	आपद्धर्मप्रकरणम्	१५३-१५६	३६०-३६१
२४	वानप्रस्थधर्मप्रकरणम्	१५७-१६७	३६१-३६३
२५	यतिधर्मप्रकरणम्	१६८-१८३	३६३-३६८
२६	प्रायश्चित्तप्रकरणम्		३६९-२०७
	कर्मविपाकाः	१८४-१८९	
	महापातकप्रायश्चित्तानि	१९०	
	संप्रयोगः पञ्चमं महापातकम्	१९१	
	उपपातकानि	१९२-१९३	
	प्रायश्चित्तहेतवः	१९४-१९५	
	प्रायश्चित्तनियमाः	१९६	

यमनियमाः	७९७ - ८०१
व्रतनियमाः	८०२ - ८०६
वपनम्	८०७ - ८१०
बालकस्य न प्रायश्चित्तम्	८११ - ८१२
अकामकृतायाः ब्रह्महत्यायाः प्रायश्चित्तम्	८१३
ब्रह्महत्याप्रायश्चित्तम्	८१४ - ८१५
ब्रह्महत्यासमानां प्रायश्चित्तम्	८१६
द्विजसर्पादिवधे ब्रह्मवधसमानव्रतम्	८१७
सुरापानप्रायश्चित्तम्	८१८ - ८२०
सुरापानगुरुतल्पगमनप्रायश्चित्तम्	८२१
अनृतवचने प्रायश्चित्तम्	८२२
अस्तेयानि	८२३
हिरण्यस्तेये प्रायश्चित्तम्	८२४ - ८२५
अपहृतिः	८२६
गुरुतल्पगतौ प्रायश्चित्तम्	८२७ - ८२८
सगोत्रागमने प्रायश्चित्तम्	८२९
पशुवधे अदत्तानां दाने च प्रायश्चित्तम्	८३०
अदेयं दत्त्वा प्रायश्चित्तम्	८३१
अविक्रेयाणि	८३२

सुरालवणादिविक्रये प्रायश्चित्तम्	८३३
अपण्यविक्रये प्रायश्चित्तम्	८३४
क्रयविक्रये प्रायश्चित्तम्	८३५-८३६
विप्रस्य चाण्डालीगमने	८३७
स्त्रीणां व्यभिचारे प्रायश्चित्तम्	८३८
अवकीर्णि प्रायश्चित्तम्	८३९-८४२
दिवामैथुनादौ प्रायश्चित्तम्	८४३
परिवित्त्यादि प्रायश्चित्तम्	८४४-८४६
स्त्रीवधे प्रायश्चित्तम्	८४७-८४८
शूद्रवधादि प्रायश्चित्तम्	८४९-८५२
क्षत्रियवैश्यशूद्रवधे - प्रायश्चित्तम्	८५३
आगतस्थ क्षत्रियादिवधे प्रायश्चित्तम्	८५४
पशूनां प्रमापणे वैश्यहत्याव्रतम्	८५५
पशूनां व्यवसोपहारः	८५६
अपकृष्टवधे प्रायश्चित्तम्	८५७
अमितिपूर्वप्रमापणे प्रायश्चित्तम्	८५८
नास्तिकादि प्रायश्चित्तम्	८५९

कन्यादूषणे प्रायश्चित्तम् ८६०
अग्न्युत्सादि प्रायश्चित्तम् ८६१
रजस्वलादिगमने प्राय० ८६२
पशुगमने प्राय० ८६३-८६५
स्वप्ने रेतसोत्सर्गे प्राय० ८६६
रेतोमूत्रादित्यागे प्राय० ८६७
दुःस्वप्नदर्शने प्राय० ८६८
पादप्रतापने प्राय० ८६९
अशुचिद्रव्यस्याग्निप्रक्षेपे प्राय० ८७०
अभिशस्तादि भोजने प्राय० ८७१
प्राणवृत्त्यर्थं औषधादिपाने प्राय० ८७२
लशुनपलाण्ड्वादिभक्षणे प्राय० ८७३
क्षीरमभोज्यम् ८७४
अभक्ष्यभक्षणे प्राय० ८७५
मांसभक्षणे प्राय० ८७६-८८३
संसर्गदुष्टभोजने प्राय० ८८४
भावदूषितभोजने प्राय० ८८५

क्रियाकालदुष्टाशने प्राय० ८८६-८८७

गुणदुष्टाशने प्राय० ८८८

श्राद्धभोजने प्राय० ८८९-८९१

~~पतितस्पर्शादि प्राय०~~ ८९२-८९३
वर्णोच्छिष्टाशने प्राय०

पतितशिष्टान्नभोजने प्राय० ८९४

पतितस्पर्शादि प्राय० ८९५

मद्यभाण्डस्थिततोयग्रहणे प्राय० ८९६-८९८

शूद्रभाण्डस्थितान्नभोजने प्राय० ८९९

दुष्टभाण्डोदकपाने स्त्रिया सह भोजने प्राय० ९००

पीतावशेषितं पाने प्राय० ९०१

शुनाद्युच्छिष्टभक्षणे प्राय० ९०२-९०५

वामहस्तस्थिते दर्भे उदकपाने प्राय० ९०६

एकपङ्क्तौ विषमदाने प्राय० ९०७

शूद्रान्नभक्षणे प्राय० ९०८-९०९

सूतकभोजने प्राय० ९१०

भक्ष्याभक्ष्ये ब्राह्मणानां विशेषः ९३३

नीलीकाष्ठभक्षणादि प्राय० ९३३-९३४

पलाशवृक्षशयनयानाध-
ध्यासस्य प्राय० ९३५

अन्तरा गमने प्राय० ९३६

होमकाले स्वाध्यायादि
समयेऽन्तरागमने प्राय० ९३७

अमुक्तकच्छस्य मूत्र-
पुरीषोत्सर्गे प्राय० ९३८

उपनयनकालातिक्रमे प्राय० ९३९

मुखधर्मिलभक्षणे प्राय० ९२०

प्रेतकार्याण्यकृत्वा धनहरणे
प्राय० ९२१-

स्त्रीपुरुषबन्धे प्राय० ९२२

अग्निदानां गरदानादीनां
प्राय० ९२३

दाराग्न्यादिकानां लाभे
विघ्नकर्तुः प्राय० ९२४

शय्यारूढादीनां अभिवा-
दने प्राय० ९२५

अन्यत्र निमन्त्रितेन अन्यत्र- ९२६-९२८
भोजने प्राय०

यतिसान्तपनम्	१२९
कृच्छ्रसान्तपनम्	१३०
अघमर्षणकृच्छ्रलक्षणम्	१३१-१३२
पर्णकृच्छ्रः	१३३
पादकृच्छ्रः	१३४
शीतकृच्छ्रः	१३५-१३६
अतिकृच्छ्रः	१३७
प्राजापत्यम्, वृद्धकृच्छ्रः, बालकृच्छ्रः	१३८
श्रीकृच्छ्रः	१३९
वारुणकृच्छ्रः	१४०
तुलापुरुषम्	१४१-१४२
ब्रह्मकूर्चव्रतम्	१४३
प्राजापत्यम्	१४४
चान्द्रायणव्रतम्	१४५-१४६
यावकव्रतम्	१५०-१५३
गङ्गास्नानं सर्वपापापहम्	१५४
व्रतनियमाः	~~[illegible]~~ १५५-१५९
जपमहिमा	१६०-१६३

—०—

CHAPTER 6·2

शङ्खलिखितस्मृतिः

आचाराध्यायः

उपोद्घातप्रकरणम्

[प्रमाणानि]

1 शङ्खः

समीक्ष्य निपुणं धर्ममृषिभ्यो मनुभाषितम् ।
आम्नायात्सम्यगुद्धृत्य शङ्खश्च लिखितस्तथा ॥

२ शङ्खलिखितौ

आम्नायप्रामाण्यादाचारः सर्वेषामुपदिश्यते ।

३ शङ्खः

तत्र वेदमूलाः स्मृतयः ।

4 शङ्खलिखितौ

आम्नायः स्मृतिधारकः ।

[धर्मशास्त्रप्रणेतारः]

५ शङ्खलिखितौ

स्मृतिधर्मशास्त्राणि तेषां मनुविष्णुयमदक्षाङ्गिरोऽत्रि-
बृहस्पत्युशन-आपस्तम्बवसिष्ठकात्यायनपराशरव्यास-
शङ्खलिखितसंवर्तगौतमशातातपहारीतयाज्ञवल्क्यप्रचेत-
सादयः ।

[धर्मशास्त्रस्य महत्वम्]

6 शङ्खः

अमार्गेण प्रवृत्तानां व्याकुलेन्द्रियचेतसाम् ।
निवर्तकं धर्मशास्त्रं व्याधीनामिव भेषजम् ॥

7 शङ्खलिखितौ

रागद्वेषाग्निदग्धानामज्ञानविषपायिनाम् ।
चिकित्सा धर्मशास्त्राणि व्याधीनामिव भेषजम् ॥

8 शङ्खलिखितौ

वेदा वै विप्रकीर्णत्वाद्दुर्ज्ञेया धर्मसाधनम् ।
सुबोधास्तत्समर्था हि ब्रह्मणा विहिता श्रुतिः ॥

श्रुतिस्मृत्युदितान्धर्मान्मानवास्तान्पृथक्पृथक् ।
कुर्वतः प्राप्नुयुर्धर्ममन्यथा नरके गतिः ॥
श्रौतं स्मार्तं क्रियावाक्यं हेतुभिर्यो विघातयेत् ।
असच्छास्त्रमुपाश्रित्य स ज्ञेयः शिष्टनिन्दितः ॥

[धर्मलक्षणानि]

9 तत्र धर्मलक्षणानि । देशः काल उपायो द्रव्यं श्रद्धा पात्रं त्यागः इति समयः[1] । तेषु धर्मादयः साधारणः । अन्यथा[2] विपरीतः ।

10 शङ्खः

देश आर्यो गुणवान्प्रागस्तादर्वागुदयाद् यावदुच्चागिरयोः
यावत्पुण्याः सरितः प्राक् सिद्धत्वाद्देशः सनातनः पुण्यः ।
कृष्णमृगो यावद्विचरति तावदाचारः स्यात् । प्राक् सिन्धु-
सौवीराद्दक्षिणेन हिमवतः पश्चात्काम्पिल्यादुदक् पारियात्रा-
दनवद्यं ब्रह्मवर्चसं सर्वेषामतोऽन्यदेशजातिकुलधर्माणामन्वयाः।

[श्रुतिविरोधे प्रमाणम्]

11 शङ्खः

तुल्यश्रुतिविरोधे विकल्पाः श्रुतयः । श्रुतिरिह गरीयसी ।
स आम्नायः ।

12 शङ्खलिखितौ

श्रुतिविरोधे त्रैविध्यसमवायेषु निर्णयः । दशावरेषु । श्रुति-
ग्रहणं स्मृत्याचारधर्मप्रमाणमात्रोपलक्षणार्थम् ।

[पर्षत्]

13 शङ्खलिखितौ

श्रेयांश्चत्वारो वेदविदो धर्मशास्त्रविदिति । पञ्चावरामेके ।
दशावरेषु धर्मानुव्यवहरणं यथावलेपं शास्त्रतस्तौ
स धर्मः ।

14 शङ्खलिखितौ

ऋग्यजुः सामाथर्ववेदषडङ्गविदुञ्छवृत्तिर्नैष्ठिको ब्रह्मचारी पञ्चाग्निरिति दशावरा पर्षत् । तत्समवाये धर्मव्यवहरणम् ।

ब्रह्मचारिप्रकरणम्

[ब्राह्मणस्याधिकारः]

15 शङ्खः

एतानि ब्राह्मणोऽधिकुरुते स च वृत्तिं दर्शयतीतरेषाम् ।

16 शङ्खलिखितौ

आपत्स्वपि हि कष्टासु परमं नैव कामयेत् ।
नाभक्ष्यं भक्षयेत्किञ्चिन्न पूर्वचरितं चरेत् ॥
तेजोमयानि पूर्वेषां नवीनानीन्द्रियाणि च ।
पापैस्ते नोपलिप्यन्ते पद्मपत्रमिवाम्भसा ॥
सुरां पिबन्ति त्रिदशाः सा चापेया द्विजातिभिः ।
हरन्ति वित्तं यत्सिद्धाः तैर्नाऽसिद्धैर्न विद्यते ॥

[ब्राह्मणः सर्वमर्हति]

17 शङ्खलिखितौ

इन्धनोदकाग्निकाष्ठतृणोपलपुष्पफलपर्णादानेष्वनापचयं
देवतीर्थाभिगमनं गृहकोष्ठप्रवेशनं पथि शस्त्रधारणमसंबद्ध-
मासनं प्रस्तुतेष्वनिवारणं असद्भावस्येति शिलोञ्छपदयो-
र्धान्यराशिग्रहणमगोत्सर्गप्रसववृद्धिकार्षापणशुल्कनदीतीरे-
ष्वनुपरोधनं परस्त्रीसंभाषणं राजस्त्रीदर्शनं व्यतिक्रमणं
च कोपात्सर्वमर्हति ब्राह्मणः ।

[संस्कारः]

18 शङ्खलिखितौ

पाकयज्ञा हविर्यज्ञाः सोमसंस्थास्तथैव च ।
संस्कारा ह्यग्निहोत्रान्ता[1] अग्निहोत्रं तु जुह्वतः ॥
संस्कारैः संस्कृतः पूर्वैरुत्तरैरनुसंस्कृतः[2] ।
नित्यमष्टगुणैर्युक्तो ब्राह्मणो ब्रह्मलौकिकः[3] ॥
ब्राह्मं पदमवाप्नोति तस्मान्न च्यवते पुनः ।
नाकपृष्ठं यशो धर्मं त्रिरीजानस्त्रिविष्टपम् ॥

[रजस्वलाशुद्धिः]

19 शङ्खः

शुद्धा भर्तुश्चतुर्थेऽह्नि अशुद्धा दैवपैत्रयोः ।
दैवे कर्मणि पैत्रे च पञ्चमेऽहनि शुध्यति ॥

20 शङ्खः

साध्वाचारा न तावत्स्यात्स्नातापि स्त्री रजस्वला ।
यावत्प्रवर्तमानं हि रजो नैव निवर्तते ॥

21 शङ्खः

रोगेण यद्रजः स्त्रीणामत्यर्थं तु प्रवर्तते ।
अशुच्यो नैव तास्तेन येन वैकारिकं हि तत् ॥

22 शङ्खः

ऋतौ संगच्छतः पुंसो यावत्षोडशमं दिनम् ।
युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ॥

२३ शङ्खलिखितौ

ऋतुस्नातां तदहोरात्रं परिहरेत् ।

२4 शङ्खलिखितौ

न मलिनां नाशक्तां नाभ्यक्तां नाभ्यक्तः न रोगार्तां न रोगार्तः ।

न हीनाङ्गीं नाधिकाङ्गीं तथैव च वयोऽधिकाम् ।
नोपयेद्गर्भिणीं नारीं दीर्घमायुर्जिजीविषुः ॥

२5 शङ्खलिखितौ

नार्तवे[1] दिवा मैथुनं व्रजेत्[2] । क्लीबा[3] अल्पवीर्याश्च[4] दिवा प्रसूयन्तेऽल्पायुषश्च[5][6] । तस्मात्[7]तत्परिवर्जयेत् ।

२6 शङ्खलिखितौ

प्रजाकामः । पितॄणां नेह वै तन्तुं विच्छिन्द्यात्पर्यते[1]- ताच्छेदाय येनाप्रतिष्ठः पतति[2] । तस्मात्प्रजाकामः[3] प्रजया प्रतिष्ठेत् ।

[सीमन्तोन्नयनम्]

२7 शङ्खयाज्ञवल्क्यौ

षष्ठेऽष्टमे वा सीमन्तः ।

२8 शङ्खः

गर्भस्पन्दने[1] सीमन्तोन्नयनं यावद्वा न प्रसवः ।

[जातकर्म]

29 शङ्खलिखितौ

प्रसूते जातकर्म यवपिष्टमधुसर्पिर्भिर्मन्त्रवत्प्राशनं तस्य सुवर्णान्तर्हितयानामिकया मेधाधिकं ब्राह्मणस्य करोति एवमितरयोः ।

30 शङ्खलिखितौ

कुमारप्रसवे[1] नाड्यामच्छिन्नायां[2] गुड[3]तिलहिरण्यवस्त्रप्रावरण[4]-गोधान्यप्रतिग्रहेष्वदोषः[5] । तदहरित्येके[6] ।

31 शङ्खलिखितौ

तस्मात्स दिवसः पुण्यः पितॄणां प्रीतिवर्धनः ।
स्मरणाच्चैव पूर्वेषां तदहर्न प्रदुष्यति ॥

32 शङ्खः

सर्वेषां सकुल्यानां द्विपदचतुष्पदधान्यहिरण्यानि दद्यात् ।

[नामकर्म]

33 शङ्खः

आशौचे तु व्यतिक्रान्ते नामकर्म विधीयते ।

34 शङ्खलिखितौ

दशम्यामुत्थाप्य पिणुवर्धनं पितॄणां तत्र सान्निध्यमिति[1] श्रुतेः । ब्राह्मणे चाहुतिं पूर्वं[2] पितॄननुमान्य[3] तदहरेव नामकरणं कुर्यात् ।

35 शङ्खलिखितौ
कुलदैवतानक्षत्राभिसम्बद्धं पिता नाम कुर्यात् ।

36 शङ्खलिखितौ
अन्यो वा कुलवृद्धश्चतुरक्षरं द्व्यक्षरं वा घोषवदाद्यन्तरन्तस्थं
पुंसामीकारान्तं स्त्रीणामेवं कृते नाम्नि शुचि तत्कुलं भवति ।

37 शङ्खः
अयुग्माक्षरमाकारान्तं स्त्रियै तद्धितमपि ।
ईकारान्तं स्त्रीणामिति स्वकुलसम्बद्धं कुर्यात् ॥

[निष्क्रमणम्]

38 शङ्खलिखितौ
अत उर्ध्वं तृतीये मासे निष्क्रमणिका ।

39 शङ्खः
चतुर्थे मासि कर्तव्यं बालस्यादित्यदर्शनम् ।

[कर्णवेधः]

40 शङ्खगोभिलौ
हनुमूलादधः कर्णौ लम्बौ तु परिकीर्तितौ ।
द्व्यङ्गुलौ त्र्यङ्गुलौ शस्तौ तेन शातातपोऽब्रवीत् ॥

[अन्नप्राशनम्]

41 शङ्खलौगाक्षि:

संवत्सरेऽन्नप्राशनमर्धसंवत्सर इत्येके ।

42 विष्णुसोमशङ्खबृहस्पतियाज्ञवल्क्या:

षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले ।

[चूडाकरणम्]

43 शङ्खलिखितौ

तृतीये वर्षे चूडाकर्म विधीयते ।

44 शङ्खलिखितौ

द्वितीये वा तृतीये वा कर्तव्यं श्रुतिचोदनात् ।।

तृतीये वर्षे चूडाकर्म पञ्चमे वा ।

45 शङ्खयाज्ञवल्क्यौ

चूडाकर्म यथाकुलम् ।

[उपनयनम्]

46 शङ्ख:

पयोयवाग्वामिक्षाहारा: क्रमशस्त्रयाणामुपनयनाहनि

गर्भाधानादिषु संस्कारेषु दश दश विप्रा भोज्या: ।

[ब्राह्मणादीमुपनयनवर्षाणि]

47 शङ्खलिखितौ

गर्भाष्टमे ब्राह्मणमुपनयेत् । राजन्यमेकादशे द्वादशे वैश्यम् ।

48 मनुशङ्खौ

गर्भाष्टमेषु कुर्वन्ति ब्राह्मणस्योपनायनम् ।
एकादशे क्षत्रियस्य वैश्यस्य द्वादशे स्मृतम् ॥

49 शङ्खलिखितौ

आ षोडशाद् ब्राह्मणस्यानतीतकालो भवति । आ द्वाविंशा-
द्राजन्यस्य आ चतुर्विंशाद्वैश्यस्यातो निष्क्रान्तकालाः पतन्ति
[इति] श्रुतिः । पूर्वपूर्वोत्तरकालातिक्रमेषु पतिता भवन्ति व्रात्याः ।

50 शङ्खः

षोडशाब्दानि विप्रस्य राजन्यस्य द्विविंशतिः । विंशतिः
सचतुष्का च वैश्यस्य परिकीर्तिता ॥
नातिवर्तेत सावित्री अत उर्ध्वं निवर्तते ।
विज्ञातव्यास्त्रयोप्येते यथाकालमसंस्कृताः ॥
सावित्रीपतिता व्रात्याः सर्वधर्मबहिष्कृताः ।

51 शङ्खलिखितौ

व्रात्यश्चान्द्रायणं चरेत् गोप्रदानं च कुर्यात् चान्द्रायणाशक्तो
धेन्वष्टकं तन्मूल्यं वा सार्धद्वाविंशतिकार्षापणाः गोमूल्यं
कार्षापणः एकः मिलित्वा सार्धं त्रयोविंशति कार्षापणाः
देयाः

[द्वादशपुत्राः संस्कार्याः]

52 शङ्खः

एते द्वादशपुत्राश्च संस्कार्याः स्युर्द्विजातयः ।

[असंस्कार्याः]

53 शङ्खलिखितौ

नोन्मत्तमूकान् संस्कुर्यात् ।

[शूद्रस्य उपनयनम्]

54 शङ्खः

मन्त्रवर्जं शूद्रस्य ।

[उपनयनकालाः]

55 शङ्खः

वसन्तो ग्रीष्मः शरदिति कालाः ।

[वासांसि]

56 शङ्खः

क्षौमदुकूलसौत्राणि वासांसि त्रयाणां वर्णानाम् ।

[उत्तरीयाणि]

57 शङ्खः

कृष्णरुरुबस्ताजिनान्युत्तरीयाणि

58 शङ्खः

पर्णपिप्पलबिल्वानां क्रमाद्दण्डाः प्रकीर्तिताः ।

59 शङ्खलिखितौ

बिल्वपलाशखादिराश्वत्थपैलयोदुम्बरा दण्डाः
केशललाटवक्त्रान्ताः ।

60 शङ्खः

केशावधिललाटनासातुल्याः प्रोक्ताः क्रमेण ।

[मौञ्जी]

61 शङ्खः

त्रिगुणीकृतरज्जुस्तु त्रिवृत्या सन्नियोजयेत् ।
~~ब्रह्मग्रन्थी~~
ब्रह्मग्रन्थिः स विज्ञेयः सदा मौञ्ज्यादिषु द्विजैः ॥

62 शङ्खः

सर्वेषां वा मौञ्जी ।

[गुरुधर्माः]

63 मनुशङ्खौ

उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः ।
आचारमग्निकार्यं च संध्योपासनमेव च ॥

[व्रतचर्या]

64 शङ्खलिखितौ

उपनयनादूर्ध्वं व्रतचर्या ।

[अभिवादनम्]

65 शङ्खः

प्रयतः काल उत्थाप्य स्नातो हुतहुताशनः ।
कुर्वीत प्रणतो भक्त्या गुरूणामभिवादनम् ॥

66 शङ्खः

नोदकुम्भहस्तोऽभिवादयेन्न भैक्षं चरन्न पुष्पाज्यादि-
हस्तो नाशुचिर्न जपन्न देवपितृकार्यं कुर्वन्न शयानः

[भैक्षचर्या]

67 शङ्खः

याचयेद्याचितं चान्नं त्रिधा कृत्वैकभागकम् ।
अग्नौ व्याहृतिभिः स्थाप्य भागमेकं गुरोरपि ॥
एकं भुञ्जीत मतिमान् स्वाध्यायं च ततः पठेत् ।
सायं प्रातस्ततो भिक्षेत्सायं प्रातस्तु भोजनम् ॥

[कमण्डलुधारणम्]

68 लिखितहारितौ

दक्षिणपार्श्वे कमण्डलुधारणमुक्तं दृष्टार्थतया संगच्छेते ।

[ब्रह्मचारिवर्ज्याणि]

69 शङ्खः

तैलाभ्यङ्गं च ताम्बूलं मांसं कांस्ये च भोजनम् ।
ब्रह्मचारी यतिश्चैव विधवा परिवर्जयेत् ॥

[पवित्रलक्षणम्]

70 शङ्खः

नीवीमध्ये स्थिता दर्भा ब्रह्मसूत्रे च ये धृताः ।
पवित्रांस्तान्विजानीयाद्यो तु कर्णे च दक्षिणे ॥

[उपाध्यायलक्षणम्]

71 शङ्खः

भृतकाध्यापको यस्तु स उपाध्याय उच्यते ।

[गुरुपूजनमहिमा]

72 शङ्खः

न स्नानेन न होमेन नैवाग्निपरिचर्यया ।
ब्रह्मचारी दिवं याति स याति गुरुपूजनात् ॥

[गुरूणां सम्माननम्]

73 शङ्खलिखितौ

न मातापित्रोरन्तरमिच्छेत्पुत्रः कामं मातुरेवानुब्रूयात् । सा हि धारिणी पोषणी च । न पुत्रः प्रतिमुच्येतान्यत्र सौत्रामणीयागाज्जीवन्नृणान्मातुः ।

74 शङ्खलिखितौ

अत्याज्या माता तथा पिता सपिण्डाः गुणवन्तः सर्व एव अत्याज्याः[1] । यस्त्यजेत्कामादपतितान्स दण्डं प्राप्नुयाद्द्विगुणं[2] शतम् । न मातापितरावतिक्रामेन्न गुरुं त्रयाणां व्यतिक्रमा[3]-दङ्गच्छेदः ।

75 शङ्खः

अथ मान्याः माता पिता पितुर्भार्या ज्येष्ठो[1] भ्राता ज्येष्ठ-
भगिनी ज्येष्ठश्यालः पितुः सखा गुरू[2]राचार्यः पितृव्यो
मातुलश्च श्वश्रुश्वसुरवृद्धाः ।

76 शङ्खलिखितौ

उपशिक्षितानि चास्य न कुर्वीतान्यत्राचारात् ।
न वाशिष्टकथाभिरभिवदेत् ।

77 शङ्खलिखितौ

आसनशयनेषु नैकस्तिष्ठेदन्यत्र यज्ञसंस्तरशिबिकावाहन-
शकटोपयानाभ्युदयेभ्यः ।

78 शङ्खः

न वे[1]दमधीत्यान्यां विद्यामधीयी[2]तान्यत्र वेदाङ्गस्मृ[3]तिभ्यः ।

79 शङ्खः

उपाध्याये राजनि च श्रोत्रिये च मृते सब्रह्मचारिणि
चन्द्रार्कयोः ।

80 शङ्खः

राहुदर्शने शक्रध्वजप्रप[1]तने आचार्ये च[2] मृते त्रिरात्रम् ।

81 शाङ्खः

अष्टम्याः प्रदोषे ।

82 शाङ्खलिखितौ

कामतो वास्मिन्नेव स्वाध्यायः ।
प्रयोजनापेक्षी गायत्रीरुद्रकल्पोपनिषत्स्वभिरतः ।
सवनोपस्पर्शी शेषवृत्तिसंबन्धत्वेनोक्तमुपासीत ।
आत्मरतिर्गुरुकुलनिष्ठ आत्मनिष्ठो वा । सोऽमृतत्वमाप्नोति ।

83 शाङ्खलिखितौ

आहुताध्यायी पवित्राञ्जलिपाणिः सपवित्रं गायत्रीमनुश्राव्य
गुरोरभिमुखं स्वाध्यायमनुपठेत् ।

84 शाङ्खलिखितौ

तपसा भवितात्मानः सत्यधर्मपरायणाः ।
ब्रह्मणैवोपसंपन्ना ब्राह्मणा ब्रह्मलौकिकाः ।

85 शाङ्खलिखितौ

चतुर्विंशकमष्टाचत्वारिंशकं वा ब्रह्मचर्यम् ।
तन्मुखे समाधेयम् । नैष्ठिकमात्मज्ञानसंस्थम् ।
पूर्वोत्तरयोरेकज्ञानमनारम्भत्वात् । आचार्यश्रान्तः ।
यन्त्री शुद्धिमाप्नोति ।

८६ शङ्खलिखितौ

न च्यवन्ते पुनस्तस्माच्छुद्धा धर्मतपोमयाः ।
लोकास्तेजोमयास्तेषां ये चरन्त्यूर्ध्वरेतसः ॥

८७ शङ्खलिखितौ

उर्ध्वरेतस एवैके पारिव्राज्यमिच्छन्ति न गृहस्थवानप्रस्थौ।
पूर्वस्यानुच्छेदादुभयधर्मोपपत्तेरुत्तरस्यानपेक्ष्यत्वादेकाश्रमम्।

८८ शङ्खः

निर्घातभूमिवेगोल्कपातदिग्दाहपांशुशोणितमांसास्थिक-
सदधिलाजगौरसर्षपेषु स्वस्त्ययनं कृत्वाभ्यञ्जनाकृष्ण-
वान्तभ्रमदुःस्वप्नदर्शनेष्वेकोद्दिष्टसूतकमृतकोद्वायं प्रायश्चित्तं
कृत्वा ब्राह्मणगमनेष्ट्यादीति दत्वानुज्ञाबाधीयीरन् ।

८९ शङ्खलिखितौ

नावभृथयज्ञवारे । नापश्रूयतः । नेन्द्रचापदर्शनात् ।

९० शङ्खलिखितौ

न नगरचतुष्पथमहापथसङ्क्रमेषु ।

९१ शङ्खलिखितौ

न राजमहापुरुषाणां स्वर्जाते । न वान्तः । न विरक्तः ।

नाजीर्णे । न कौमुद्याम् । न कुलमित्रेऽतीते ।

12 शङ्खः

नाधीयीताभियुक्तोऽपि यानगो न च नौगतः ।
देवायतनवल्मीकश्मशानवनसन्निधौ ॥

13 शङ्खः

राजसु च खरोष्ट्रेषु च गजेषु च हयेषु च ।

14 शङ्खः

अष्टमी हन्त्युपाध्यायं शिष्यं हन्ति चतुर्दशी ।
हन्ति पञ्चदशी मेधां तस्मात्पर्वाणि वर्जयेत् ॥
आयुः प्रजां पशून्मेधां कृत्यानि सुकृतानि च ।
अनध्यायेष्वभ्यसतो ब्रह्म व्याहरतस्तथा ॥

15 शङ्खः

छिद्रेष्वेवावतिष्ठन्ति ये केचित्पुरुषाधमकाः ।
तत्रस्था ब्रह्म ते घ्नन्ति ब्राह्मणैर्यदुपार्जितम् ॥

16 शङ्खः

रात्रीयामान्धकारे वा प्राणबाधाभये सति ।
यथा सुखं प्रकुर्वीत रात्रावहनि वा द्विजः ॥

97 लिखितः

छिद्राण्येतानि विप्राणां येऽनध्यायाः प्रकीर्तिताः ।
छिद्रेभ्यः स्रवति ब्रह्म ब्राह्मणेन यदर्जितम् ॥

98 लिखितः

तत्काले तस्य रक्षांसि श्रियं ब्रह्म यशो बलम् ।
सर्वमादाय गच्छन्ति वर्जयन्तीप्सितं फलम् ॥

99 शङ्खः

प्रजापतिर्हि तिष्ठति सर्वविद्यास्वपर्वसु ।
तस्माद्धर्मार्थकामो वै नैताः पर्वसु कीर्तयेत् ॥

[समावर्तनसमयः]

100 शङ्खलिखितौ

द्वादश द्वादश वर्षाणि वा प्रतिवेदं यावद्ग्रहणं वा
वेदस्य तावद्ब्रह्मचर्यमाचरेत् ।

[स्नातकधर्माः]

101 शङ्खः

बालवृद्धमत्तोन्मत्तोपहतदेहभाराक्रान्तस्त्रीस्नातक-
प्रव्रजितेभ्यः ।

102 शङ्खः

अथ ब्राह्मणायाग्रे पन्थाः देयो राज्ञा इत्येके ।
तच्चानिष्टं गुरुज्येष्ठश्च ब्राह्मणो राजानमतिशेते ।
तस्मै पन्था इति ।

103 शङ्खलिखितौ

पन्था देयो बालप्रव्रजितविद्याशिल्पगुणप्रकृष्टेभ्यः ।

104 शङ्खलिखितौ

पापरोगीगर्भिणीस्नातकप्रव्रजितविद्याविद्गुणवृद्धेभ्यः
पन्था देयः ।

105 शङ्खः

तुषकेशकरीषभस्मास्थितश्लेष्मनखलोमान्यप्सु न
निक्षिपेन्न पादेन पाणिना वा जलमभिहन्यात् ।

106 शङ्खलिखितौ

नोद्धतकुहकैः सहैकतस्तिष्ठेत् ।

107 शङ्खलिखितौ

नाहेः पदमधितिष्ठेत् । न तुषकपालकेशभस्मास्थि-
तृणसङ्करकूटे तिष्ठेत् ।

108 शङ्खलिखितौ

नेन्द्रधनुश्चन्द्रसूर्यपरिवेषोल्काः परस्मै कथयेत् ।

नात्मनः प्रतिकूलं न[2] महाजनवि[3]रोधं कुर्यात् ।
न गोष्ठीभिः सम्बध्यात् ।

109 शङ्खलिखितौ

[1] न परस्त्र्यागारे गां चरन्तीं पाययन्तीं चान्यस्मै कथयेत् ।
न गोब्राह्मणोपरोधे अश्नीयात् । न[2] वाह्यमाने वाह्यमीति
ब्रूयात् ।

110 शङ्खलिखितौ

नोद्यन्तमादि[1]त्यमीक्षेत । नास्तं यान्तं आप्यायनं च ।
तस्मै विधिवत् विदधाति ।

111 शङ्खलिखितौ

न शिष्टानसत् कुर्यात् ।

112 शङ्खलिखितौ

न कूपस्थआप्यातिष्ठेत् । न कूपमवलोकयेत् ।
न लङ्घयेत् ।

113 शङ्खलिखितौ

नाग्निं ब्राह्मणं च पादेनाधितिष्ठेत् ।

114 शङ्खलिखितौ

नाशुचिरग्निं परिचरेत् । न ऋषिपितृदेवताः कीर्तयेत् ।
न गाधोदकमवगाहेत । नोपाञ्जलिना पिबेत् ।

115 शङ्खलिखितौ

नापोऽञ्जलिं चैकलो धारयेत् ।

116 शङ्खलिखितौ

आपस्स्वपि हि कष्टासु परस्वं कामयेत् न ।
नाभक्ष्यं भक्षयेत्किञ्चिन्न पूर्वचरितं चरेत् ॥
न स्त्रियं विवसनामीक्षेत् । न परपुरुषमन्यत्र
स्वाभाव्यात् । * * * न पादेन पादं प्रक्षालयेत् ।
न दर्भैः परिमृज्यात् । न महाजनविरोधं कुर्यात् ।
न गोष्ठीभिः सम्बध्येत् । न गणबन्धुसमवायं प्रविशेत् ।
न याज्यं याजयेत् । नानुयोगं प्रब्रूयात् । न ब्रह्म-
विक्रयमिच्छेत् । न वाह्यमाने वाह्यमानमिति ब्रूयान्न
परिषन्मध्ये स्वैरवाक्स्यात् । नानियुक्तोऽग्रासनं
गच्छेन्नाभ्याधिकं दद्यान्न प्रतिगृह्णीयात् । - * * न
दावम् - * * - न दम्पत्योरन्तरम् । नर्षीणां प्रभवं
न नदीनां न महात्मनाम् ।
न मद्यं दद्यात् । न प्रतिगृह्णीयात् । न धर्मं ख्यापयेत् ।
नाधर्मं संवृत्तं कुर्यात् । नापसव्यं परिदध्यात् । न भूमिं
विलिखेत् । न पादेनाभिहन्यात् । नाङ्गमुखवादित्राणि
कुर्यात् । न कूपवृक्षाणि विलोकयेत् । न लोकविद्वि-
ष्टानि समाचरेत् । सर्वं विरुद्धं परिहरेत् ।

117 शङ्खलिखितौ

अकर्त्तव्यं न कर्तव्यं प्राणैः कण्ठगतैरपि ।
कर्तव्यमेव कर्तव्यं प्राणैः कण्ठगतैरपि ॥

118 शङ्खलिखितौ

नैकोऽध्वाने प्रपद्येत नानुपालवक्ते । नाऽयज्ञोपवीती न शूद्रादि सहायः ।

119 शङ्खलिखितौ

गोब्राह्मणसमवायेन्द्रकीलचतुष्पथान्यभिज्ञातांश्च वनस्पतीन् प्रदक्षिणानि कुर्यात् ।

120 शङ्खलिखितौ

न रात्रौ विचरेत् । न ब्राह्मैरयुक्तैरपीतपानीयैः पिबेत् । न ग्रासमदत्त्वाश्नीयात् ।

विवाहप्रकरणम्

[वर्णक्रमेण भार्याः]

121 शङ्खलिखितौ

भार्याः कार्याः सजातीयाः श्रेयस्यः सर्वेषां स्युरिति
पूर्वः कल्पः, ततोऽनुकल्पः, चतस्रो ब्राह्मणस्यानुपूर्व्येण,
तिस्रो राजन्यस्य, द्वे वैश्यस्य, एका शूद्रस्य ।

122 शङ्खः

ब्राह्मणी क्षत्रिया वैश्या ब्राह्मणस्य प्रकीर्तिता ।
क्षत्रिया चैव वैश्या च क्षत्रियस्य प्रकीर्तिता ।
वैश्यैव भार्या वैश्यस्य शूद्रा शूद्रस्य कीर्तिता ।

123 शङ्खः

आपद्यपि न कर्तव्या शूद्रा भार्या द्विजेन तु ।
तस्यां तस्य प्रसूतस्य निष्कृतिर्नोपपद्यते ॥

[अनुलोमप्रतिलोमजाः तेषां कर्माणि]

124 शङ्खः

समानवर्णासु पुत्राः समानवर्णा भवन्ति ।
अनुलोमासु मातृवर्णाः प्रतिलोमासु विगर्हिताः ॥

।३५ शूद्रः

विप्रायां नापिताज्जातो वेणुकः परिकीर्तितः ।
राज्ञ्यां तु जनितस्तेन कर्मकारः स उच्यते ॥
विप्रायामुग्रतो जातस्तक्षवृत्तिः प्रकीर्तितः ।
वैश्यायां तेन निष्पन्नः समुद्रो नाम जायते ॥

" द्विजोत्तमायां दौष्यन्ताद्भगलब्धः प्रजायते " ।

" ब्राह्मण्यां यो मुनिश्रेष्ठा वैदेहेन प्रजायते ।
स नाम्ना रजको ज्ञेयः पण्डितैः पण्डितोत्तमाः " ॥
"आयोगवेन ब्राह्मण्यां चर्मकारः प्रजायते " ।
" द्विजोत्तमायां चाण्डालाद्यः पुमाञ्जायते भुवि ।
श्वपचः स तु विज्ञेयः सर्वशास्त्रविशारदैः " ॥
श्वपचाद्विप्रकन्यायां गुहको जायते सुतः ।

॥ उक्तं च ।

गुहकः श्वपचो भिल्लुस्तक्षवृत्ती च नापितः ।
रजकश्चर्मकारश्च बन्दिको वेणुकस्तथा ॥
भगलब्धो बाह्यदासः इति चाण्डालसंस्मृतः ।

॥ एवं ब्राह्मण्यामुक्त्वा क्षत्रियायामाह ॥

क्षत्रवात्यान्नृपायां तु सल्लो मल्लश्च मल्लकः ।
संज्ञात्रयमेकजातीयस्य ।

मल्ला तु पिच्छिलस्तेन नराख्यो जायते भुवि ।
नरात्करणसंज्ञस्तु करणात्कर्मसंज्ञितः ॥
तेन द्रमिल उत्पन्नो नृपायां वेदवित्तमाः ।
नृपायां यो निषादेन जातोऽधो नापितः स्मृतः ॥
नृपायां मागधाज्जातः खनकः परिकीर्तितः ।
खनकाद्राजकन्यायामुद्गन्धो नाम जायते ॥

॥ अथ वैश्यायाम् ॥

वैश्यव्रात्यात्तु वैश्यायां सुधन्वना जायते द्विजाः ।
अनेनाचार्यसंज्ञस्तु भारुषो भारुषादपि ॥
द्विजन्मा जायते तस्मान्मैत्रो मैत्रात्तु सात्वतः ।
अचार्याख्यो भवति ततो भारुषस्ततो द्विजन्मेत्याद्यर्थः ॥
वैश्यायां तु निषादेन सुनिषादोऽभिजायते ।
मणिकारस्तु वैश्यायां चौर्याद्वैश्येन जायते ॥
वैश्यायां यस्तु चण्डालाज्जातो दन्तकवेणवः ।
जनितस्तेन शूद्रायां विप्रो आश्रमिकः स्मृतः ।

॥ अथ शूद्रायाम् ॥

चौर्याच्छूद्रेण शूद्रायां जातो मानविको भवेत् ।
शूद्रायां मागधाज्जातः कुकुन्दः प्रोच्यते बुधैः ॥
प्रतिलोम निषादाद्यः शूद्राणां स तु भैरवः ॥

॥ अथ मैत्रायाम् ॥

मैत्रायां वैदेहकात्तु जातो मातङ्गनामकः ।
मातङ्गाज्जायते सूतः सूताद्दस्युः प्रजायते ॥
दस्योर्जातो मुनिश्रेष्ठा मालाकारः समाख्यया ।
प्रतिलोमनिषादेन कैवर्ताख्यो विजायते ॥

॥ अथ तैलिकायाम् ॥

तैलिकारिस्त्रियां जातोऽयोगवेन द्विजोत्तमाः ।
तिलादिवर्णविक्रेता नाम्ना वेदार्थवित्तमाः ॥
कारुश्चाभूत्तस्त्स्यां जात्या ज्ञेयस्तथैव च ।
कारी चाभूत्समाख्याय निषादेन मुनीश्वराः ॥
चर्मजीवी समुत्पन्नः सर्वविज्ञानसागराः ।

126 शङ्खलिखितौ

एवं वर्णभेदः । प्रमादाद्दौर्बल्याच्च राज्ञस्तु किल्बिषं कर्तुर्यद्वापयेत् तेषां प्रतिनियतानि कर्माणि राज्ञा प्रतिपादनीयानि ।

[सगोत्रो वर्ज्यः]

127 शङ्खापस्तम्बौ

सगोत्राय दुहितरं न प्रयच्छेन्मातुश्च योनिसम्बन्धेभ्यः ।

[शूद्रानिषेधः]

128 शङ्खः

तपस्वी धर्म[1]शीलश्च सर्व[2]धर्मभृतां वरः ।
ध्रुवं शूद्रत्वमाप्नोति शूद्रश्राद्धे त्रयोदशे ॥

129 शङ्खः

नीयते तु सपिण्डत्वं येषां शूद्रकुलोद्भवः ।
सर्वे शूद्रत्वमायान्ति यदि स्वर्गो जितस्तु तैः ॥

130 शङ्खः

सपिण्डीकरणं कार्यं कुलजस्य तथा ध्रुवम् ।
आद्यद्वादशकं कृत्वा प्राप्ते श्राद्धे त्रयोदशे ॥

131 शङ्खः

सपिण्डी[1]करणे नार्हो न च[2]ै शूद्रस्तथा ध्रुवम्[3] ।
तस्मात्सर्वं प्रयत्नेन शूद्रां भार्यां विवर्जयेत् ॥

[ब्राह्मविवाहलक्षणम्]

132 शङ्खलिखितौ

तत्र सवर्णः सवर्णाय विदित्तो विदिताय[1] यो नग्निकां
दद्यात् स ब्राह्मः ।

[आर्षविवाहलक्षणम्]

133 शङ्खलिखितौ

गोमिथुनेन वस्त्रयुगलेन चार्षः सर्वैश्चालङ्कारः स्त्रीधनं च देयम् ।

[प्राजापत्यविवाहलक्षणम्]

134 शङ्खलिखितौ

सम्पादयन्तयोरात्मानं च प्राजापत्यः पश्चार्षः त्रीन्दैव उत्तरेषु क्रियाप्राधान्यम् ।

[असमानार्षगोत्रजां परिणयेत्]

135 शङ्खः

अनुज्ञातो गुरुणा मातापित्रोरनुमतो दारानाहरेत् ।

136 शङ्खः

दारानाहरेत्सदृशानसमानार्षेयानसम्बन्धानसप्तमपञ्चमान्पितृमातृबन्धुभ्यः ।

137 शङ्खः

विन्देत विधिवद्भार्यामसमानार्षगोत्रजाम् ।
मातृतः पञ्चमीं चापि पितृतस्त्वथ सप्तमीम् ॥

138 शङ्खः

पञ्चमी चोभयतः ।

[वर्णक्रमेण कन्यायाः हस्तादिग्रहणम्]

139 शङ्खलिखितौ

इषुं गृह्णाति राजन्या । प्रतोदं वैश्या । दशान्तं शूद्रा ।
ब्राह्मणस्तु सवर्णायाः पाणिं गृह्णीयात् ।

[गृहस्थधर्माः]

140 शङ्खलिखितौ

वरयित्वा वरः कश्चित्प्रणश्येत्पुरुषो यदा ।
ऋत्वागमान् त्रीनतीत्य कन्याऽन्यं वरयेद्वरम् ॥
[प्रदाय शुल्कं] गच्छेद्यः कन्यायाः स्त्रीधनं तथा ।
धार्या सा वर्षमेकं तु देयान्यस्मै विधानतः ॥
अथ प्रवृत्तिरागच्छेत् प्रतीक्षेत समात्रयम् ।
अत ऊर्ध्वं प्रदातव्या कन्याऽन्यस्मै यथेच्छया ॥

141 हारीतशङ्खलिखितयमैः

याज्ञियाः समिध आहृत्य सम्मार्जनोपलेपनोद्बोधन-
समूहनसमिन्धनपर्यग्नीकरणपरिक्रमणोपस्थानहोम-
स्तोत्रनमस्कारादिभिरग्निं परिचरेन्नाग्निमधितिष्ठेन्न
पद्भ्यां कर्षेन्न मुखेनोपधमेन्नापश्चाग्निं च —

युगपद्धारयेन्नाजीर्णमुक्तो नोच्छिष्टो वाभ्यादध्यात् ।
विविधैर्हविर्विशेषैराग्नेयैरहरहरग्निं समिन्धेत् ।
आमन्त्र्य गच्छेदौहत्यं निवेदयेत् तन्मनाः । शरीरो-
परमात्मो ब्रह्मणः सायुज्यं गच्छति ।

142 शङ्खः

नापसव्यं परिदध्यान्न च विकृतं वासः ।

143 शङ्खः

एतैरेव गुणैर्युक्तं धर्मार्जितं धनं तथा ।
याजयेत सदा विप्रो ग्राह्यस्तस्मात्प्रतिग्रहः ॥

144 शङ्खलिखितौ

आहारं मैथुनं निद्रां संध्याकालेषु वर्जयेत् ।
कर्म चाध्ययनं चैव तथा दानप्रतिग्रहौ ॥

145 शङ्खलिखितौ

नान्तरितां नावश्लिष्टां नाधिकां न समां
न हीनां न कुत्सितां नानर्थकारीं वृत्तिं लिप्सेत् ।

146 शङ्खः

त्रैवार्षिकाधिकान्नस्तु पिबेत्सोममतन्द्रितः ।
इष्टिं वैश्वानरीं कुर्यात्तथैवाल्पधनो द्विजः ॥

147 शङ्खः

सहस्रं भोजयेत्सोमे ब्राह्मणानां शतं पशौ ।
चातुर्मास्येषु सर्वेषु शतं पर्वणि पर्वणि ॥

148 शङ्खः

इष्टिभिः पशुबन्धैश्च चातुर्मास्यैर्यजेत्तु यः ।
अग्निष्टोमादिभिर्यज्ञैर्यजेत च[2] स इष्टवान् ॥
अग्निहोत्रं तपः सत्यं वेदानां चैव पालनम् ।
[3]आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ॥
एकाग्निकादौ यत्कर्म त्रेतायां यच्च हूयते ।
अन्तर्वेद्यां च यद्दानं इष्टं तदभिधीयते ॥
रोगिणां परिचर्या च पूर्तमित्यभि[4]निर्दिशेत् ।

149 शङ्खलिखितौ

अवाप्य वृत्तिं धर्मेण नित्यस्नायी प्रियातिथिः ।
अग्निहोत्रपरस्सम्यग् गृहस्थो नावसीदति ॥

150 शङ्खलिखितौ

दारानाकृत्याग्न्याधेयपुनराधेयाग्निहोत्रदर्शपौर्णमास-
दाक्षायणचातुर्मास्यपशुसौत्रामण्यन्तैर्हविर्यज्ञैः
सप्तभिर्यजेत् ।

151 शङ्खः

ज्येष्ठे तिष्ठत्यनूढे वा अग्निहोत्राधिकारिणि ।
अनुज्ञया विनाधानं विवाहं नैव कारयेत् ।

152 शङ्खलिखितौ

ऋत्विक् मन्त्रसमायुक्तो यस्त्वौषधिगुणान्वितः ।
यज्ञेन देवानाप्नोति यावन्नाप्नोति दक्षिणाम् ॥
प्रत्याश्रमं स्थिता वर्णाः कर्मभिर्व्यक्ततां गताः ।
नियमाचारधर्माणां ब्राह्मणस्तत्र देशकः ॥
सम्पूज्यः सोऽर्चनीयश्च गुरुः संस्कारकर्मकृत् ।
पूज्यो मधुपर्कादिना अर्चनीयो दक्षिणादिना ॥
अग्नयस्तन्मुखाः सर्वे देवाश्चाग्निमुखाः स्मृताः ॥
ऋचो यजूंषि सामानि अथर्वाङ्गिरसानि च ।
तानि विप्रेष्वधीतानि ते यज्ञा आप्तदक्षिणाः ॥

153 शङ्खलिखितौ

नाल्पसंभारो यजेत नापि संवत्सरवृत्तिरनिष्टं हि
राष्ट्रे निपतत्यनिष्टं यज्ञसवनं यजमानं चोदयति ।

154 शङ्खः

सायं प्रातश्च जुहुयादग्निहोत्रं यथाविधि ।

155 शाङ्खः

आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ।

[स्त्रीधर्माः]

156 शाङ्खः

[1]नानुक्ता गृहान्निर्गच्छेत् । नानुत्तरीया । न [2]त्वरितं व्रजेत् । न परपुरुषम[3]भिभाषेतान्यत्र वणिक्प्रव्रजित-वृद्धवैद्येभ्यः । न नाभिं दर्शयेत् । आगुल्फाद्वासः परि-दध्यात् । न स्तनौ [4]विवृतौ कुर्यात् । न हसेद[5]नपावृतम् । न भर्तारं न तद्बन्धून्वा विद्विषेत् । [6]न गणिका धूर्त-[7]व्यभिचारिणी प्र[8]व्रजितेक्षणिकामाया[9]मूलकुहककारिका-[10]दुःशीलादिभिः सहैकत्र तिष्ठेत् । [11]संसर्गेण हि चारित्र्यं [12]दुष्यतीत्यादिशन्ति । न भर्तुः प्रतिकूलमाचरेत् । न प्रकीर्णभाण्डभोजनीयोपस्करद्रव्यानोत्थानखट्वासन-पादुका स्यात् ।

157 शाङ्खाङ्गिरसौ

तिस्रः कोट्यर्धकोटी च यानि रोमाणि मानुषे ।
तावत्कालं वसेत्स्वर्गे भर्तारं यानुगच्छति ॥
व्यालग्राही यथा व्यालं बलादुद्धरते बिलात् ।
तद्वदुद्धृत्य सा नारी सह तेनैव मोदते ॥
तत्र सा भर्तृपरमा स्तूयमानाप्सरोगणैः ।
क्रीडते पतिना सार्धं यावदिन्द्राश्चतुर्दश ॥

ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वा भवेत्पतिः ।
पुनात्यविधवा नारी तमादाय मृता तु या ॥
मृते भर्तरि या नारी समारोहेद् हुताशनम् ।
सारुन्धती समाचारा स्वर्गलोके महीयते ॥
यावच्चाग्नौ मृते पत्यौ स्त्री नात्मानं प्रदाहयेत् ।
तावन्न मुच्यते सा हि स्त्रीशरीरात्कथञ्चन ॥

158 शङ्खः

यस्मिन्भावोऽर्पितः स्त्रीणामार्तवे तच्छीलं जनयति । यथा नीलवृषेण नीलवत्सप्रसवः । श्वेतेन श्वेत एव जायते । एवं योनिरेव बलवती । यस्माद्गुणाः संकीर्यन्ते ।

159 शङ्खः

लोहितो यस्तु वर्णेन मुखे पुच्छे तु पाण्डुरः ।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥

160 शङ्खलिखितौ

कामचारिणीं मलिनां कुचेलां पिण्डमात्रोपजीविनीं निवृत्ताधिकारामधःशय्यां निरुद्धां निवासयेदत्यर्थंव्यभिचारिणीम् ।

161 शङ्खलिखितौ

श्वः श्वः पचनभाण्डानामुपलेपनम् ।
[1]सुसंमृष्टगृहद्वारोपलेपनम् । कृतशौच्यानुकूल्य दध्यक्षत-
[2]दूर्वाप्रवालपुष्प[3]कृतबलिकर्म श्वश्रू[4]श्वशुराद्यभिवादनानन्तरं[5]
गृहावश्यकानि कुर्यात् । न देवभूतपतिभ्योऽग्रेऽश्नीयात्
न भर्तुः अन्यत्र प्रतिकारौषधात् ।

162 शङ्खलिखितौ

न भर्तारं द्विष्याद्[1]यद्यप्यष्ठीवलः स्यात् । पतितोऽङ्ग[2]हीनो
व्याधितो वा । पतिर्हि [3]दैवतं स्त्रीणाम् । न व्रतोप[4]वास-
नियमेज्यादान[5]धर्मो [6]वाऽनुग्रहकरः स्त्रीणामन्यत्र पति-
शुश्रूषायाः । [7]कामं भर्तुरनु[8]ज्ञया व्रतोपवासनियमे[9]ज्यादी-
नामभ्यासः [10]स्त्रीधर्मः ।

163 शङ्खलिखितहारीतउशनसबृहस्पतिव्यासाः

साध्वीनां स्त्रीणां अनुमरणमुक्तम् ।

164 शङ्खः

न व्रतेनोपवासेन धर्मेण विविधेन च ।
नारी स्वर्गमवाप्नोति प्राप्नोति पतिपूजनात् ।

165 शङ्खलिखितौ

न वै स्त्रीणां व्रतं न मन्त्रक्रिया न कार्यम् ।

166 शङ्खलिखितौ

सर्वासां प्रोषिते भर्तरि[1] ब्राह्मणी चारित्र्यं रक्षेत् ।
इतरासां मातापितरौ अनन्तरौ[2] राजन्यो वा ।

167 प्रेक्षाताण्डवविहारचित्रदर्शना[3]ङ्गनागोद्यानयानविवृत[4]-
शायनोत्कृष्टपानभोजनकन्दुकक्रीडाधूप[5]गन्धमाल्यालङ्कार-
दन्तधावनाञ्जनदर्शन[6]साधनादीनामस्वतन्त्राणां प्रोषित-
भर्तृकाणां [7]कुलस्त्रीणामनारम्भः ।

[अधिवेदनम्]

168 शङ्खलिखितौ

धूर्तां वैनाशिकीं स्त्रीजननीं वन्ध्यामप्रियवादिनीम् ।

169 शङ्खः

वन्ध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजाः ।
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥

170 शङ्खलिखितौ

अप्रियशीलां पुरुषद्वेषिणीमननुकूलां चाधिविन्देत ।

[पुनर्भूस्वैरिण्यादयः]

171 शङ्खः

तिस्रः पुनर्भ्वश्चतस्रः स्वैरिण्यः ।

172 शङ्खलिखितौ

तत्र पूर्वा पूर्वा जघन्या तासामपत्यानामृक्थपिण्डोदक-
वर्जेषु यो विकल्पः स मातुरेव गुणवत्तया व्याख्यातः ।

[वर्णजातिविवेकः तेषां कर्माणि]

173 शङ्खः

ब्राह्मणेन[1] क्षत्रियायामुत्पादितः[2] क्षत्रियः[3] एव भवति ।
क्षत्रियेण[4] वैश्यायामुत्पादितो[5] वैश्य एव भवति[6] ।
वैश्येन शूद्रायामुत्पादितः शूद्र एव भवति ।

174 शङ्खः

मूर्धावसिक्तादीनां मातृजातीयत्वं वर्णत्वं च ।

175 शङ्खः

क्षत्रियवैश्यानुलोमानन्तरोत्पन्नो[1] रथकारस्तस्येज्या[2]-
यानोपनयनसंस्कारक्रिया अश्वप्रतिष्ठारथसूत्रवास्तु-
विद्याध्ययनवृत्तिता च ।

176 शङ्खलिखितौ

पूर्वे धर्म एव क्षत्रियः। शस्त्राजीवक्षत्राणव्यवहारदण्डरक्षणानु-
शासनमिति वृत्तयः। पूर्वे धर्म एव वैश्यः। कृषिः पशु-
पाल्यं वाणिज्यं योनिपोषणं वृद्धिप्रयोगः।

177 शङ्खलिखितौ

चाण्डालानामेकान्तवासः श्मशानसंरक्षणं श्वकुलपरिधावनं
वैध्यघातित्वमिति कर्माणि। श्वपचानां चैवम्।
दस्युम्लेच्छगणानां च कृतशास्त्रोपजीवनमिति कर्माणि।
नार्यः सजातीयाः सर्वेषां श्रेयस्यः स्युः।

178 शङ्खलिखितौ

चाण्डाल्यवकीर्णी कन्यादूषी सगोत्रगाम्यबीजी।

179 शङ्खः

चतुर्भिर्दर्भपिञ्जूलैर्ब्राह्मणस्य पवित्रकम्।
एकैकं न्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमम्॥

180 शङ्खलिखितौ

त्रिषु वर्णेष्वसंस्कृतप्रसूतः स्यात्कालातिक्रान्तः
पतितसावित्रीको ब्राह्मणः।

141 शङ्खलिखितौ

क्षत्रियायामुग्रसङ्गे श्वपाकः। वैदेहकायामम्बष्ठ~~[illegible]~~-
संयोगे वेनः। शूद्रायां निषादेन पुल्कसः मागधेन कुक्कुटकः।

142 शङ्खलिखितौ

सूतानामश्वसंस्कारक्रिया केशश्मश्रुनखलोमवापन-
स्नपनविलेपनान्यलङ्करणमश्वदमन योग्यासनप्रेक्षणानि
कर्माणि। क्षत्तुः प्रतीहारवौत्ये। मागधानां मृदङ्गवेणु-
वीणावादननृत्यगीतपुष्पमाणवककर्मसिद्धिकोपस्थान-
गाथाश्लोकप्रत्यूषप्रतिबोधनानि कर्माणि। अम्बष्ठानां
जातिविशेषात्कायशल्यशलाकारसायनविषोन्मादन-
क्लीबज्वरापस्मारकुमारचिकित्साशरीरपोषणादि
कर्माणि। वैदेहकानां पत्रच्छेदनसीवनरञ्जनानिर्वेजन-
वापीतडागोद्यानारामावस्करशोधनानि कर्माणि।
उग्राणां कुञ्जरग्रहणराजच्छत्रधारणपुरतः प्रधावनबन्ध-
नागरसंयमनानि कर्माणि। वेणानां लङ्घनवनक्रीडा-
नियुद्धमायाशाम्बरेन्द्रजालप्रस्थापनप्रहरणानि कर्माणि।
कुक्कुटानां प्रहरणकरणचक्रतोमरभिण्डिपालपाशासि-
परश्वधलगुडलोहजालिकासमरसंधारणादीनि कर्माणि।
अयोगवानामवस्करणकुम्भकरणसुवर्णरजतमणिलोहादि
शिल्पकरणानि चर्मवृत्तिता चेति।

पुल्कसानां नगरवीथीरक्षणजागरणानाथमृतनिर्हरण-लेख्यपत्रच्छेदमालिकत्वमिति कर्माणि । निषादानां वागुरापाशसंधारणमृगपशुपक्षिमत्स्यधारणमधुपातन-विकर्तनादीनि कर्माणि ।

[प्रबोधः]

183 शङ्खः

ब्राह्मे मुहूर्ते तूत्थाय मूत्रपुरीषोत्सर्गं कुर्यात् ।

[मूत्रपुरीषोत्सर्गक्रिया]

184 शङ्खः

वाग्यतोऽवगुण्ठितशिरा भूमिमन्तर्धाय मेहेत् ।

185 शङ्खलिखितौ

नासंवृते मूत्रपुरीषे उत्सृजेत् । न सान्तर्वासा न निर्वासाः ।

186 शङ्खः

नानुदको नामृत्को नापरिवेष्टितशिराः ।

187 शङ्खलिखितौ

अकस्मान्मूत्रं पुरीषं विसृजति पाणिना पाणिं पीडयति नखान्निकृन्तति हसति तूष्णीं ध्यायत्येवमादि दुष्ट-लक्षणं कुलस्य च स्वामिनोऽन्यत्र प्रकृतिशीलात् ।

188 शाङ्खः

मूत्रं पुरीषं नो कुर्यात् सोपानत्कः कथञ्चन ।
उत्सृज्य मृज्जले कुर्यात्प्रस्रावे मेहनं द्विजः ॥

189 शाङ्खः

न गोमयकृष्टोप्तशाद्वलचितिश्मशानवर्त्मखलपर्वत-
पुलिनेषु मेहेत् । भूताध्यासत्वात् ।

190 शाङ्खः

न वृक्षदेवायतने न भस्मनि न गोव्रजे ।
न मूत्रं पथि कुर्वीत न वल्मीके न शाद्वले ॥
न फालकृष्टे न जले न चितौ न च पर्वते ।
न ससत्वेषु गर्तेषु न गच्छन्न च तिष्ठता ॥
न छत्रमस्तकः कुर्यात्सोपानत्कः सपादुकः ।
वाय्वग्निविप्रमादित्यसमुखं गां सरस्वतीम् ॥

191 शाङ्खः

मेहने मृत्तिका सप्त लिङ्गे द्वे परिकीर्तिते ।
एकस्मिन्विंशतिर्हस्ते द्वयोर्ज्ञेयाश्चतुर्दश ॥

192 शाङ्खः

रोमाणि प्रथमे पादे द्विपादे श्मश्रुवापनम् ।
पादहीने शिखावर्ज सशिखं तु निपातने ॥

193 शङ्खः

षडन्या नखशुद्धौ तु देयाः शौचेप्सुना मृदः ।

194 शङ्खः

प्रदेया वामहस्तस्य पश्चाद्भागे तु षण्मृदः ।

195 शङ्खदक्षौ

तिस्रस्तु मृत्तिका देयाः[1] कृत्वा तु[2] नखशोधनम् ।
तिस्रस्तु पादयोर्देयाः[3] शौचकामस्य[4] नित्यदा ॥

196 शङ्खः

[1]एतच्छौचं गृहस्थानां तथा गुरुनिवासिनाम् ।
द्विगुणं स्याद्वनस्थानां यतीनां तु[2] चतुर्गुणम् ॥

197 शङ्खः

मृत्तिका तु समुद्दिष्टा त्रिपर्वी पूर्यते यया ।

[आचमनविधिः]

198 शङ्खलिखितौ

[1]अङ्गुष्ठमूलस्योत्तरतः प्रागग्रायां रेखायां ब्राह्मं[2] तीर्थं[3]
प्रदेशिन्यङ्गुष्ठयोरन्तरा पित्र्यं कनिष्ठिकातलयो-
रन्तरा प्राजापत्यम् । पूर्वेणाङ्गुलिपर्वाणि दैवम् ।

199 शङ्खलिखितौ

ब्रह्मतीर्थेनाचामेत् ।

अङ्गुष्ठस्यानामिकया योगेन श्रवणे स्पृशेत् ।
कनिष्ठाङ्गुष्ठयोगेन स्पृशेत्स्कन्धद्वयं ततः ॥
नाभिं च हृदयं तद्वत् स्पृशेत्पाणितलेन तु ।
संस्पृशेच्च तथा शीर्षमयमाचमने विधिः ॥

206 वृद्धशङ्खः

त्रिः प्राश्नीयाद्यदम्भस्तु प्रीतास्तेनास्य देवताः ।
ब्रह्माविष्णुश्च रुद्रश्च भवन्तीत्यनुशुश्रुम ॥
गङ्गा च यमुना चैव प्रीयेते परिमार्जनात् ।
पादाभ्यां प्रीयते विष्णुर्ब्रह्मा शिरसि कीर्तितः ॥
नासत्यदस्रौ प्रीयेते स्पृष्टे नासापुटद्वये ।
स्पृष्टे लोचनयुग्मे तु प्रीयेते शशिभास्करौ ॥
कर्णयुग्मे तथा स्पृष्टे प्रीयेते त्वनलानिलौ ।
स्कन्धयोः स्पर्शनादेवं प्रीयन्ते सर्वदेवताः ॥
नाभिस्पर्शेन देवेशाः प्रीयन्ते चास्य नित्यशः ।
संस्पृष्टे हृदये चास्य प्रीयन्ते सर्वदेवताः ॥
मूर्ध्नि[4]संस्पर्शनाद[5]स्य प्रीतस्तु पुरुषो भवेत् ।
भूम्यम्बूत्सर्गतो भावो विशुद्धिश्च चराचरम् ॥

207 शङ्खः

ततोऽङ्गुलि चतुष्केण स्पृशेन्मूर्धानमादितः ।
तर्जन्यङ्गुष्ठयोगेन स्पृशेन्नेत्रद्वयं पृथक् ॥

मध्यमानामिकाभ्यां तु स्पृशेन्नासापुटे क्रमात् ।
अङ्गुष्ठेन कनीयस्याः कर्णौ संयोगतः स्पृशेत् ॥
तर्जन्यङ्गुष्ठयोगेन नाभिं हृदि तलं न्यसेत् ।

२०८ शङ्खः

अतः परं प्रवक्ष्यामि शुभामाचमनक्रियाम् ।
कायं कनीजिका मूले तीर्थमुक्तं द्विजस्य तु ॥
अङ्गुष्ठमूले च तथा प्राजापत्यं प्रकीर्तितम् ।
अङ्गुल्यग्रे स्मृतं दिव्यं पित्र्यं तर्जनीमूलके ॥
प्राजापत्येन तीर्थेन त्रिः प्राश्नीयाज्जलं द्विजः ।
द्विः प्रमृज्य मुखं पश्चात् खान्यद्भिः समुपस्पृशेत् ॥

२०९ शङ्खलिखितौ

त्रिः प्राश्य द्विः परिमृज्य शिरश्चक्षुः श्रोत्रं
घ्राणं हृदयं चालभेत् ।

२१० शङ्खः

सर्वासामेव योगेन नाभिं च हृदयं तथा ।
संस्पृशेच्च तथा शीर्षमयमाचमने विधिः ॥

२११ शङ्खः

विना यज्ञोपवीतेन तथा मुक्तशिखोऽपि वा ।
अप्रक्षालितपादो वाप्याचान्तोऽप्यशुचिर्भवेत् ॥

२।२ शाङ्ख:
न तिष्ठन्न प्रणतो नाङ्गुलिभिर्न मुखशब्दं
कुर्वन्नाधौतपादो नायज्ञोपवीती न मुक्तशिखः (आचामेत्)।

२।३ शाङ्ख:
कृत्वा मूत्रं पुरीषं च स्नात्वा भोक्तुमनास्तथा।
भुक्त्वा क्षुत्त्वा तथा सुप्त्वा पीत्वा चाम्भोऽवगाह्य च॥

२।४ शाङ्ख:
रथ्यामाक्रम्य चाचामेद्वासो विपरिधाय च।

२।५ शाङ्ख:
शुक्तवाक्याभिधाने पुनराचामेत्।

२।६ शाङ्ख:
काष्ठाहस्तस्तु नाचामेत्कदाचिद्विधिशङ्कया।
प्रायश्चित्तेन युज्येत दूर्वाहस्तस्तथैव च॥

२।७ शाङ्ख:
स्नाने भोजनकाले च सन्ध्ययोरुभयोरपि।
आचान्तः पुनराचामेत् जपदानार्चनेषु च॥

२।८ शाङ्ख:
शूद्राहृतैस्तु नाचामेत्तैकपाण्याहृतैस्तथा।
न चैवावृतहस्तेन नापरिज्ञातहस्ततः॥

२१९ शङ्खलिखितौ

मूत्रपुरीषष्ठीवनादिषु शुक्तवाक्याभिधानेषु पुनः पुनरुपस्पृशेत् ।

२२० शङ्खः

अद्भिः समुद्धृताभिस्तु हीनाभिः फेनबुद्बुदैः ।
वह्निना च न तप्ताभिरक्षाराभिरुपस्पृशेत् ॥

२२१ शङ्खः

उभयत्र स्थितैर्दर्भैः समाचमति यो द्विजः ।
सोमपानफलं तस्य भुक्त्वा यज्ञफलं लभेत् ॥
ग्रन्थिर्यस्य पवित्रस्य न तेनाचमनं भवेत् ।
आचामेद्यस्तु मोहाच्च यथा भोक्ता तथा तु सः ॥

[दन्तधावनम्]

२२२ शङ्खः

कुमाराणां च नारीणां कर्तव्यं चतुरङ्गुलम् ।

२२३ शङ्खः

दन्तवद्दन्तलग्नेषु रसवर्जनमन्यत्र जिह्वाभि-मर्शनात् ।

२२४ शङ्खः

अलाभे दन्तकाष्ठानां प्रतिषिद्धे तथाहनि ।

[स्नानविधिः]

225 शाङ्खः

प्रातःस्नानं नित्यस्नानम् ।

226 शाङ्खः

प्रातः संक्षेपतः स्नानं शौचार्थं तु तदिष्यते ।
मन्त्रैस्तु विधिनिर्वाह्यं मध्याह्ने तु सविस्तरम् ॥

227 शाङ्खः

स्नानं तु द्विविधं प्रोक्तं [1]गौणमुख्यप्रभेदतः ।
तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधं भवेत् ॥
नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम् ।
क्रियास्नानं [2]तथा षष्ठं षोढा स्नानं [3]प्रकीर्तितम् ॥
[4]अस्नातस्तु पुमान्नार्हो [5]जप्याग्निहवनादिषु ।
प्रातःस्नानं [6]तदर्थं तु नित्यस्नानं [7]प्रकीर्तितम् ॥
चण्डाल[8]शवयूपादि स्पृष्ट्वा [9]स्नानं रजस्वलाम् ।
स्नानार्हस्तु [10]यदाप्नोति स्नानं नैमित्तिकं[11] च तत् ॥
[12]पुष्यस्नानादिकं यत्तु दैवज्ञ[13]विधिचोदितम् ।
तद्धि काम्यं समुद्दिष्टं [14]नाकामस्तत्प्रयोजयेत् ॥
जप्तुकामः [15]पवित्राणि [16]अर्चिष्यन्देवताः पितॄन् ॥
स्नानं समाचरे[17]द्यस्तु क्रियाङ्गं [18]तत्प्रकीर्तितम् ।
मलापकर्षणं [19]नाम स्नानमभ्यङ्गपूर्वकम् ॥

मलापकर्षणार्थं[20] तु प्रवृत्तिस्तस्य[21] नान्यथा ।
सरःसु देवखातेषु तीर्थेषु[22] च नदीषु च ।
क्रियास्नानं समुद्दिष्टं स्नानं तत्र मता क्रिया ॥

२२८ शाङ्ख:
यत्तु तीर्थादिषु स्नानं क्रियास्नानं प्रकीर्तितम् ।
स्नानमेव फलं यत्तु क्रियास्नानं प्रकीर्तितम् ॥

२२९ शाङ्ख:
तत्र काम्यं तु कर्तव्यं यथावद्विधि[1]चोदितम् ।
नित्यं नैमित्तिकं[2] चैव क्रियाङ्गं मलकर्षणम् ॥
तीर्थाभावे तु कर्तव्यं उष्णोदकपरोदकैः ।
स्नातस्य[3] वह्नितप्तेन तथैव परिवारिणा ॥
शरीरशुद्धिर्विज्ञेया न तु स्नानफलं लभेत्[4] ।
अद्भिर्गात्राणि शुध्यन्ति तीर्थस्नानाद्भवेत्फलम् ॥
सरःसु देवखातेषु तीर्थेषु च नदीषु च ।
स्नानमेव क्रिया यस्मात्स्नानात्पुण्यफलं स्मृतम् ॥

२३० शाङ्ख: सर्वे प्रस्रवणाः पुण्याः सर्वे पुण्याः शिलोच्चयाः[1] ।
नद्यः पुण्याः सदा सर्वाः जाह्नवी[2] तु विशेषतः ॥
यस्य हस्तौ च पादौ च मनश्चैव[3] सुसंयतम् ।
विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते ॥

२३१ शङ्खः प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकरं हि तत् ।
सर्वमर्हति शुद्धात्मा प्रातःस्नायी जपादिकम् ॥
अलक्ष्मीः कालकर्णी च दुःस्वप्नान्दुर्विचिन्तितम् ।
याम्यं हि पातनादुःखं नित्यस्नायी न पश्यति ।
नित्यस्नानेन पूयन्ते अपि पापकृता नराः ॥

२३२ शङ्खः रथ्याकर्दमवर्षासु प्रविश्य ग्रामसङ्करम् ।
जङ्घयोर्मृत्तिकास्तिस्रः पादयोर्द्विगुणास्तथा ॥

२३३ शङ्खः क्रियास्नानं [1] प्रवक्ष्यामि यथावद्विधिपूर्वकम् [2] ।
मृद्भिरद्भिश्च कर्तव्यं शौचमादौ यथाविधि ॥
जले निमग्न [3] उन्मज्ज्य उपस्पृश्य यथाविधि ।
[4] तीर्थस्यावाहनं कुर्यात्तत्प्रवक्ष्याम्यतः परम् ॥
प्रपद्ये वरुणं देवमम्भसां [5] पतिमूर्जितम् ।
[6] याचेत देहि मे तीर्थं सर्वपापप्रमुक्तये ॥
तीर्थमावाहयिष्यामि [7] सर्वपापनिषूदनम् ।
सान्निध्यमस्मिन्स्वे [8] तोये स्थीयतां [9] मदनुग्रहात् ॥
रुद्रान्प्रपद्ये वरदान्सर्वान्प्सुषदस्त्वहम् [10] ।
सर्वान्प्सुषदश्चैव प्रपद्ये प्रणतस्त्विह [11] ॥
देवमप्सुषदं वह्निं प्रपद्येऽघनिषूदनम् [12] ।
[13] आपः पुण्याः पवित्राश्च प्रपद्ये [14] शरणं तथा ॥

[15]रुद्राश्चाग्निश्च [16]सर्पाश्च [17]वरुणाश्चाप एव च ।
[18]शमयन्त्वशुभं पापं [19]रक्षन्तु च [20]सदा [21]शुभम् ॥
इत्येवमुक्त्वा कर्तव्यं [22]ततः संमार्जनं कुशैः[23] ।
आपोहिष्ठेति तिसृभिः यथावदनुपूर्वशः ॥
[24]हिरण्यवर्णा इति च [25]ऋग्भिश्च तिसृभिस्तथा ।
शंनो [26]देवीरिति तथा शं न आपस्तथैव च ॥
इदमापः [27]प्रवहतेत्येवं [28]सर्वमुदीरयन् ।
एवं संमार्जनं कृत्वा छन्द [29]आर्षं च दैवतम् ॥
अघमर्षणसू[30]क्तस्य संस्मरेत्[31]प्रयतः सदा ।
ततोऽम्भसि निमग्नस्तु त्रिः पठेदघमर्षणम् ॥
प्रदद्या[32]न्मूर्धनि तथा महाव्याहृतिभिर्जलम् ।

234 शङ्खः 'आपो अस्मान्' इति स्मृत्वा भास्कराभिमुखः स्थितः ।
'इदं विष्णु'र्जपित्वा तु प्रतिस्रोतो निमज्जति ॥
अप्रवाहोदकस्नानं विप्रपादाभिषेचनम् ।
आदित्याभिमुखः कुर्यात्सन्ध्यावन्दनमेव च ॥

235 शङ्खः भोगाय क्रियते यत्तु स्नानं याहच्छिकं नरैः ।
तन्निषिद्धं दशम्यादौ नित्यं नैमित्तिकं न तु ॥

236 शङ्खः सर्वतीर्थाभिषेकश्च ऊर्ध्वं संमार्जनाद्भवेत् ।
अघमर्षणसूक्तेन मार्जनं कारयेत्ततः ॥

ब्राह्म आपश्च द्रुपदां कामतस्तु प्रयोजयेत् ।
ॐकारपूर्वां गायत्रीं अब्लिङ्गाभिमर्षणम् ॥

237 शाङ्ख: यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः ।
तथाघमर्षणं सूक्तं सर्वपापापनोदनम् ॥
देवता भाववृत्तश्च पापघ्नश्च प्रकीर्तितः ।
ततोऽम्भसि निमग्ने तु त्रिः पठेदघमर्षणम् ॥

238 शाङ्ख: अनेन विधिना स्नात्वा[1] अमेध्यस्नानवाससम्[2] ।
परिवर्तितवासाश्च[3] तीर्थतीरमुपस्पृशेत् ॥

239 शाङ्ख: उदकस्याप्रदाना हि स्नानशाटीं न पीडयेत् ।
अनेन विधिना स्नातः पुण्यं फलमुपाश्नुते ॥

240 शाङ्ख: सर्वतीर्थानि[1] पुण्यानि पापघ्नानि सदा[2] नृणाम् ।
परस्परानपेक्षाणि[3] कथितानि मनीषिभिः ॥

241 शाङ्ख: तीर्थं प्राप्यानुषङ्गेण[1] स्नानं तीर्थे[2] समाचरन् ।
स्नानजं फलमाप्नोति तीर्थयात्राफलं[3] न तु ।

242 शाङ्ख: नृणां पापकृतां तीर्थे भवेत्पापस्य[1] संशयः ।
यथोक्तफलदं तीर्थं भवेच्छुद्धात्मनां नृणाम् ॥

243 शङ्खः मार्गान्तरा नदी प्राप्तौ स्नानादि परपारतः।
अर्वाक्तीरे सरस्वत्या एष मार्गगतो विधिः॥
प्रवाहाभिमुखो मज्जेत् यत्रापः प्रवहन्ति वै।
स्थावरेषु च सर्वेषु आदित्याभिमुखस्तथा॥

244 शङ्खः वारुणं चावगाह्यम्।

245 शङ्खः प्रतिग्रहादुपावृत्तः सन्तुष्टो येन केनचित्।
अहङ्कारविमुक्तश्च स तीर्थफलमश्नुते ॥
अकल्को निरारम्भो लघ्वाहारी जितेन्द्रियः।
विमुक्तो दुष्टसंसर्गो स तीर्थफलमश्नुते ॥

246 शङ्खलिखितौ
आचारवतां धर्मो ह्यनवश्यक इत्याचार ऋषीणां
स्थितिः देवतानां चरित्रं मनुष्याणाम्।

247 शङ्खः अनभ्यज्जः नग्नः स्नायात्। नाप्सु मेहेत्।
नोद्घर्षणं कुर्यात्। न पादेन पाणिना वा
जलमभिहन्यात्। यस्मादापो वै सर्वा देवताः।
न स्रवन्तीं वृथातिक्रामेदनवसिच्य। अमेध्योदकं
परिहरेत्। नाल्पोदके स्नायात्। न समुद्रोदक-
मवगाहेत्।

[मार्जनम्]

२४८ श्लोकः आचम्यैवं पुरा प्रोक्ता तीर्थं संमार्जने शुभे ।
मन्त्रास्तैर्मन्त्रितं तोयं मूर्ध्नि भूयो तथा क्षिपेत् ॥
क्षिप्तेन मूर्ध्नि तोयेन पापमस्य प्रणश्यति ।
भूमौ क्षिप्तेन हन्यन्ते असुरा एव शत्रवः ॥

[प्राणायामलक्षणम्]

२४९ श्लोकः व्याहृतीः कीर्तयेच्चैव तथैवाव्ययमक्षरम् ।

२५० श्लोकः उपस्पृशेत्ततः पश्चान्मन्त्रेणानेन धर्मितः ।
अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः ॥
त्वं यज्ञस्त्वं वषट्कारः आपो ज्योती रसोऽमृतम् ॥

२५१ श्लोकः सालव्यब्रह्म चैतद्धि पुरा दृष्टं स्वयम्भुवा ।
एवं संमार्जनं कृत्वा बाह्यशुद्ध्यर्थकारणात् ॥
तथाभ्यन्तरशुद्ध्यर्थं प्राणायामं समाचरेत् ॥

२५२ श्लोकः दक्षिणे रेचकं कुर्याद्वामेनापूर्य चोदरम् ।
कुम्भकेन जपं कुर्यात्प्राणायामस्य लक्षणम् ॥
सप्तव्याहृतयः प्रोक्ताः प्राणायामे तु नित्यशः ।
भूर्भुवः स्वर्महर्जनस्तपः सत्यं तथैव च ॥

प्रत्योङ्कारसमायुक्तं तथा तत्सवितुः परम् ।
ओमापो ज्योतिरेत्येतच्छिरः पश्चात्प्रयोजयेत् ॥
त्रिरावर्तनयोगात्तु प्राणायामस्तु शब्दितः ।

253 शङ्खबृहस्पतिवसिष्ठाङ्गिरसपैठीनसिबौधायनाः

सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥

[प्राणायामान्ते मार्जनम्]

254 शङ्खः त्रिरावर्त्य तु सावित्रीं प्रणवं व्याहृतीस्तथा ।
मार्जनं च तथा कृत्वा आपो हिष्ठेति मार्जयेत् ॥
सार्धामृचश्च प्रक्षिप्य ऊर्ध्वं सार्धां समुत्क्षिपेत् ।
अधो भागविशिष्टायामसुरा यान्ति संक्षयम् ॥

[अर्घ्यप्रदानम्]

255 शङ्खः आचम्य च ततः पश्चादादित्याभिमुखो जलम् ।
उदुत्यं जातवेदेति मन्त्रेणानेन च क्षिपेत् ॥

[जपविधिः]

256 शङ्खः
एष एव विधिः प्रोक्तः सन्ध्ययोश्च द्विजातिषु ।
पूर्वां सन्ध्यां जपेत्तिष्ठन्नासीनः पश्चिमां तथा ॥

तस्यां मध्यमसन्ध्यायां सावित्रीं द्विजसत्तम ।
युवतीं शुक्लवर्णां च चारुरूपां चतुर्भुजाम् ॥
शुक्लवासद्वयोपेतां तार्क्ष्यस्कन्धगतां शुभाम् ।
शङ्खचक्रगदापद्मधारिणीं विष्णुदैवताम् ॥
विष्णुलोकनिवासां तामायान्तीं सूर्यमण्डलात् ।
एका भवति गायत्री सावित्री शुक्लवर्णिका ॥

257 शङ्खः ततो जपेत्पवित्राणि पवित्रं वा स्वशक्तितः ।
ऋषयो दीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुवन् ॥

258 शङ्खः शान्तिकामस्तु जुहुयात् गायत्रीमक्षतैः शुचिः ।

259 शङ्खः स प्रती बहिः सन्ध्यामुपासीत ।

260 शङ्खलिखितौ

पूर्वां सन्ध्या जपंस्तिष्ठेत्स्वे काले चापरां चिरम् ।
ऋषयो दीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुयुः ॥

26। शङ्खः प्रातः सन्ध्यां सनक्षत्रां मध्यमां स्नानकर्मणि।
सादित्यां पश्चिमां सन्ध्यामुपासीत यथाविधि ॥
आपो हि ष्ठेति संप्रोक्ष्य तृचेनाब्दैवतेन तु।
आपः पुनन्तु मन्त्रेण पीत्वापो मार्जयेत्पुनः ॥
दधिक्राव्ण इति च आपो हि ष्ठादिभिस्तथा।
प्रदक्षिणं परिषिच्य स्यादम्भः श्रुतिचोदितम् ॥
अर्घ्यमेकं प्रदातव्यं मध्याह्ने भास्करं प्रति।
पाणिना जलमादाय सकृत्कुर्यात्प्रदक्षिणम् ॥
दर्भान्धारयमाणः सन्नात्मनो ध्यानमाचरेत्।
आदित्यादीन् ग्रहांस्तत्र तर्पयेत्तु समाहितः ॥
अथ मध्यमसन्ध्यायामासीनः प्राङ्मुखो जपेत्।
स्थितो जपेत्सदाकालमादित्याभिमुखो द्विजः ॥
यदि स्यात्क्लिन्नवासा वै वारिमध्यस्थितो जपेत्।
सहस्रपरमां देवीं शतमध्यां दशावराम् ॥
गायत्रीं तु यथाशक्ति जपेदव्यग्रमानसः।
स्वशाखाविहितैर्मन्त्रैरादित्यमुपतिष्ठते ॥
प्रदर्शान्योगमुशामासत्येनेति मन्त्रकम्।
स्थितो जपेदूर्ध्वबाहुः सूर्यं पश्यन्समाहितः ॥

262 शाङ्ख: तत्र जप्तं हुतं दत्तं सर्वं कोटिगुणं भवेत् ।

263 शाङ्ख: स्वासपर्णपदैर्वाक्यं शुद्धमावर्तयेज्जपन् ।
न कम्पयेच्छिरो ग्रीवा दन्तान्नैव प्रदर्शयेत् ॥

264 शाङ्ख: गृहे त्वेकगुणं जप्यं नद्यादौ त्रिगुणं स्मृतम् ।
गवां गोष्ठे दशगुणमग्न्यगारे शताधिकम् ॥
सिद्धक्षेत्रेषु तीर्थेषु देवतायाश्च सन्निधौ ॥
सहस्रशतकोटीनामनन्तं विष्णुसन्निधौ ॥

[सन्ध्या]

265 शाङ्ख:
सूर्यायैव तु गायत्र्या त्रिसन्ध्यास्वञ्जलिं क्षिपेत् ।
प्रातर्मध्याह्नयोस्तिष्ठन्सायमासीन एव वा ॥
मन्देहानां वधार्थाय प्रक्षिपेदुदकाञ्जलिम् ।
प्रायश्चित्तार्थमाचम्य मुच्यते दैत्यहत्यया ॥
प्रणवव्याहृतिभिश्च कृत्वात्मानं प्रदक्षिणम् ।
आचम्यैव च ततस्तिष्ठन्ध्यायेत्सन्ध्यां समाहितः ॥

266 शाङ्ख: सायमग्निश्च मेत्युक्त्वा प्रातः सूर्यश्चेति च ।
आपः पुनन्तु मध्याह्ने उपस्पृश्य यथाविधि ॥

[सन्ध्यालोपे प्रायश्चित्तम्]

267 शङ्खः सन्ध्यादि नित्यलोपे तु दिनमेकमभोजनम् ।
दिनद्वये त्रिरात्रं स्यात्कृच्छ्रार्धं तु दिनत्रये ॥
ततोऽप्येवं प्रकल्प्य स्याद्व्यासस्य वचनं तथा ॥

[सर्ववेदपवित्राणि]

268 वसिष्ठशङ्खलिखिताः

सर्ववेदपवित्राणि वक्ष्याम्यहमतः परम् ।
येषां जपैश्च होमैश्च पूयन्ते नात्र संशयः ॥
अघमर्षणं देवकृतं शुद्धवत्यस्तरत्समाः ।
कूष्माण्ड्यः पावमान्योऽथ दुर्गासावित्र्यथैव च ॥
अभिषङ्गाः पदस्तोमाः सामानि व्याहृतीस्तथा ।
भारुण्डानि च सामानि गायत्रं रैवतं तथा ॥
पुरुषव्रतं च भासं च तथा देवव्रतानि च ।
अब्लिङ्गा बार्हस्पत्यं च वाक्सूक्तं मध्वृचस्तथा ॥
शतरुद्रियमथर्वशिरस्त्रिसुपर्णं महाव्रतम् ।
गोसूक्तं चाश्वसूक्तं च इन्द्रशुद्धे च सामनी ॥
त्रीण्याज्यदोहानि रथन्तरं च
अग्निव्रतं वामदेव्यं बृहच्च ।
एतानि गीतानि पुनन्ति जन्तून्
जातिस्मरत्वं लभते च इच्छेत् ॥

269 शङ्खः इति वेदपवित्राण्य[1]भिहितानि । एतेभ्यः सावित्री
विशिष्यते । नाघमर्षणात्पर[2]मन्तर्जले[3] । न व्याहृतिभ्यः
परं होमे । न सावित्र्याः[4] परं जप्ये । कुशबृस्यामासीनः[5]
कुशोत्तरायां[6] वा कुशपवित्रपाणि[7]रुदङ्मुखः[8] सूर्याभि-
मुखो वाऽक्षमाला[9]मादाय देवतां ध्यायन् जपं[10] कुर्यात् ।
सुवर्णमणिमुक्ताफल[11]स्फाटिकपद्माक्षेन्द्राक्षपुत्रजीवका-
नामन्यतमादक्षमालां[12] कुर्यात् । कुशग्रन्थिकृतां[13] वा
हस्तोपयामैर्वा गणयेत् । आदौ देवतामार्षं छन्दश्च
संस्मरेत् । ततः सप्रणवा व्याहृतीरादावावर्त्य ऋषि-
र्विश्वामित्रो गायत्रीछन्दः । ॐकारस्य प्रणवाख्या ।
ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं
इति महाव्याहृतयः[14] । आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः
स्वरोमिति शीर्षम्[15] ।

सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
ये जपन्ति सदा तेषां न भयं विद्यते क्वचित् ॥
शतजप्ता[16] तु सा देवी दिनपापप्रणाशिनी[17] ।
सहस्रजप्ता तु[18] तथा पातकेभ्यः प्रमोचिनी ॥
दशसाहस्रजाप्येन[19] सर्वपापप्रणाशिनी ।
[20]लक्षजप्ता तु सा देवी महापातकनाशिनी ॥

सुवर्णस्तेयकृद्विप्रो ब्रह्महा गुरुतल्पगः ।
सुरापश्च विशुध्यन्ति [21]लक्षजाप्यान्न संशयः ॥
प्राणायामत्रयं कृत्वा [22]कल्पकल्पं समाहितः ।
अहोरात्रकृतात्पापात्तत्क्षणादेव मुच्यते ॥
सव्याहृतीः[23] सप्रणवाः प्राणायामास्तु षोडश ।
अपि भ्रूणहनं [24]मासात्पुनन्त्यहरहः कृताः ॥
गायत्री वेदजननी गायत्री पापनाशिनी ।
गायत्र्यास्तु परं नास्ति दिवि चेह च पावनम् ॥
हस्त[25]त्राणप्रदा देवी पततां नरकार्णवे ।
तस्मात्तामभ्यसेन्नित्यं [26]ब्राह्मणो हृदये शुचिः ॥
गायत्रीजप्य[27]निरतं हव्यकव्येषु [28]योजयेत् ।
तस्मिन्न तिष्ठते [29]पापमब्बिन्दुरिव पुष्करे ॥
जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः ।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥
[30]उपांशु स्याच्छतगुणः साहस्रो मानसः स्मृतः ।
नोच्चैर्जप्यं बुधः कुर्यात्सावित्र्यास्तु विशेषतः ॥
सावित्रीजप्यनिरतः [31]स्वर्गमाप्नोति मानवः ।
सावित्रीजप्यनिरतो मोक्षोपायं च विन्दति ॥
तस्मात्सर्वप्रयत्नेन स्नातः प्रयतमानसः ।
गायत्रीं तु जपेद्भक्त्या सर्वकल्मषनाशिनीम् ॥

270 शङ्खः नाशुचिर्न जपन्न देवपितृकार्यं कुर्वन् ।

[जपमाला]

271 शङ्खः शतं स्याच्छङ्खमणिभिः सहस्रं तु प्रवालकैः ।
स्फाटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते ॥
पद्माक्षैर्दशलक्षं तु सौवर्णैः कोटिरुच्यते ।
कुशग्रन्थ्या च रुद्राक्षैरनन्तं फलमुच्यते ॥

272 शङ्खः त्रिस्रोऽङ्गुल्यस्त्रिपर्वाणि मध्यमा चैकपर्विका ।
अनामा मध्यमारभ्य जप एवमुदाहृतः ॥

273 शङ्खः प्रारभ्यानामिकायास्तु मध्यमे पर्वणि क्रमात् ।
तर्जनीमूलपर्यन्तमङ्गुष्ठेन यथाक्रमम् ॥
अनामामूलमारभ्य प्रादक्षिण्यक्रमेण तु ।
मध्यमामूलपर्यन्तं जपेद्दशसु पर्वसु ॥

274 शङ्खः असंख्यातं तु यज्जप्तं तज्जप्तं निष्फलं भवेत् ।

275 शङ्खः अथाङ्गुलीनां रेखाभिः जपमन्वहमाचरेत् ।
प्रारभ्यानामिकायास्तु मध्यमे पर्वणि क्रमात् ।
तर्जनीमूलपर्यन्तं जपेद्दशसु पर्वसु ॥

मध्यमाङ्गुलिमूलं तु यत्पर्वद्वितयं भवेत् ।
तं वै मेरुं विजानीयाज्जपेत्तं नातिलङ्घयेत् ॥
अनामिकामूलपूर्वं प्रारभ्यापि क्रमेण तु ।
मध्यमामूलपर्यन्तमङ्गुष्ठेन यथाक्रमम् ॥
मध्याङ्गुलेर्मध्यरेखां समारभ्य प्रदक्षिणम् ।
मध्यमामूलपर्यन्तमङ्गुष्ठेन यथाक्रमम् ॥
स्पृष्ट्वा द्वादशसंख्यास्यादेकवारेण तन्नव ।
वामहस्तेन संख्यातं शतमष्टोत्तरं स्मृतम् ॥

[पूजा]

276 शाङ्ख: चन्दनकुङ्कुमकर्पूरमृगजातीफलवर्जमनुलेपनं समाद्यात् ।

277 शाङ्ख: शङ्खचक्राद्यङ्कनं च तुलसीदलभक्षणम् ।
ये कुर्यान्नियतं भक्त्या स याति परमां गतिम् ॥
नान्यं देवं नमस्कुर्यान्नान्यं देवं निरीक्षयेत् ।
चक्राङ्कितः सदा तिष्ठेन्मद्भक्तः पाण्डुनन्दन ॥

278 शाङ्ख: शङ्खपात्रस्थितं गन्धं मन्त्रैर्दद्यात्कनिष्ठया ।

[तर्पणम्]

२७९ ब्राह्ख: दर्भाः कृष्णाजिनं[1] मन्त्रा ब्राह्मणाश्च[2] विशेषतः।
अयातयामान्येतानि नियोज्यानि पुनः पुनः ॥

२८० ब्राह्ख: कुशाभावे[1] द्विजश्रेष्ठः काशैः कुर्वीत यत्नतः[2]।
तर्पणादीनि कर्माणि काशा कुशसमा स्मृताः॥

२८१ ब्राह्ख: ये त्वन्तर्गर्भिता दर्भा ये च छिन्नास्तथैव च।
क्वथितानग्निदग्धांश्च कुशान्यत्नेन वर्जयेत् ॥

२८२ ब्राह्ख: अमावास्यासु[1] न छिन्द्यात्कुशांस्तु[2] समिधस्तथा।
सर्वत्रावस्थितो सोमे हिंसायां ब्रह्महा भवेत् ॥

२८३ ब्राह्ख: अमावास्या तु सोमेन[1] सप्तमी भानुना सह।
चतुर्थी भूमिपुत्रेण[2] सोमपुत्रेण[3] चाष्टमी ॥
चतस्रस्तिथयस्त्वेतास्तुल्याः स्युः ग्रहणादिभिः।
सर्वमक्षयमत्रोक्तं स्नानदानजपादिकम् ॥

२८४ ब्राह्ख: तस्मिन्नहनि नाश्नीयान्मासास्तं यावदेव तु।
मुक्तं दृष्ट्वा तु भुञ्जीत स्नात्वा चैव यथाविधिः॥

285 शाङ्खः विशाखासु यदा भानुः कृत्तिकासु च चन्द्रमाः ।
स योगः पद्मको नाम पुष्करेष्वपि दुर्लभः ॥

286 शङ्खलिखितौ
अमावास्या व्यतीपातो ग्रहणं चन्द्रसूर्ययोः ।
मन्वादयो युगादिश्च सङ्क्रान्तिर्वैधृतिस्तथा ॥

287 शाङ्खः वापी[1]कूपतडागेषु गिरि[2]प्रस्रवणेषु[3] च ।
नद्यां नदे देवखाते सरसीषूद्धृता[4]म्बुनि ॥
उष्णोदकेन वा[5] स्नायाद्ग्रहणे चन्द्रसूर्ययोः ।

288 शाङ्खः स्नातः कृतजप्योऽन्तर्जानुरुदङ्मुखश्च दिव्येन तीर्थेन
देवानुदकेन तर्पयेत् । अथ तर्पणविधिः ।
ॐ भगवन्तं शेषं तर्पयामि । कालाग्निरुद्रं सज्ञान-
वराहमजिनं रुक्मभौमं शैलभौमं ललाटभौमं
रक्तभौमं श्वेतभौमं कृष्णभौममिति पातालसप्तकम् ।
जम्बुद्वीपं शाकद्वीपं कुशद्वीपं क्रौञ्चद्वीपं शाल्मलि-
द्वीपं प्लक्षद्वीपं पुष्करद्वीपमिति द्वीपसप्तकम् ।
लोकालोकाख्यं पर्वतं सुधानामानं शङ्खपदं
कैमुमन्तं हिरण्यरोमाणमिति कल्पस्थायिनो
लोकपालान् ।

लवणोदकं क्षीरोदकं घृतोदकं सुरोदकमिक्षु-
रसोदकं स्वादूदकमिति समुद्रसप्तकम् ।
सागरचतुष्कम् । शृङ्गवन्तं श्वेतं नीलं मेरुं
माल्यवन्तं गन्धमादनं निषधं हेमकूटं हिमवन्त-
मिति महापर्वतान् । महेन्द्रं मलयं सह्यं शुक्ति-
मन्तमृक्षवन्तं विन्ध्यं पारियात्रमिति सप्तकुल-
पर्वतान् । कैलासमैनाक प्रमुखांश्च सप्तपर्वतान् ।
बिन्दुसरः प्रमुखानि सरांसि । सप्तप्रवाहां गङ्गाम् ।
त्रिलोकवाहिनीं गङ्गाम् । सिन्धुम् । सरस्वतीम् ।
यमुनाम् । प्रथमपुष्करम् । द्वितीयपुष्करम् । तृतीय-
पुष्करम् । प्रयागम् । नैमिषम् । गयाशीर्षम् । सर्व-
तीर्थानि । सर्वप्रस्रवणानि । सर्वाः सरितः ।
इन्द्रतीर्थम् । अश्वत्थप्रमुखान् वनस्पतीन् । यव-
प्रमुखाः ओषधीः । मानसोत्तराख्यं पर्वतम् ।
लोकपालान् । इन्द्रम् । शचीम् । वज्रम् । ऐरावतम् ।
मातलिम् । चित्रसेनप्रमुखान् गन्धर्वानप्सरसः ।
मुदो नामाप्सरसः । पशुनो नामाप्सरसः । आयुवो
नामाप्सरसः । सुधा नामाप्सरसः । पृष्मो नामा-
प्सरसः । ऊर्जो नामाप्सरसः । अग्निसन्ताम् ।
स्वाहाम् । अग्नीधम् । यमम् । धर्मम् । श्रियम् ।

सत्यम् । तपः । संयज्ञम् । दक्षिणाम् । दीक्षाम् ।
ब्रह्मचर्यम् । व्यवसायम् । धर्मराजानम् । दण्डम् ।
पिङ्गलम् । कालपाशौ । आयुधम् । स्वर्गम् । मृत्युम् ।
चित्रगुप्तम् । यमपुरुषान् । श्यामशबलौ ।
विरूपाक्षम् । नैरृतिम् । धर्मप्रधानान् । दैत्यान् ।
दानवान् । विद्याधरान् । यक्षान् । राक्षसान् ।
पिशाचान् । रोगान् । ज्वरम् । रोगाधिपम् । आरोग्यम् ।
वरुणम् । गौरीम् । नागान् । वासुकिम् । अनन्तम् ।
सर्पान् । वनस्पतीन् । वायुम् । शिराम् । प्राणापान-
समानोदानव्यानान् । इन्द्रियाणि । इन्द्रियार्थान् ।
जीवम् । सोमम् । नक्षत्राणि । वर्तमानं नक्षत्रम् ।
पितॄन् । आभास्वरम् । बर्हिषदः । अग्निष्वात्तान् ।
क्रव्यादान् । तद्रूपान् । आज्यपान् । सुकालिनः ।
महादेवम् । पार्वतीम् । सेनानीम् । स्कन्दम् ।
विशाखम् । स्कन्दग्रहान् । बालग्रहान् । स्कन्द-
पार्षदान् । रुद्रपार्षदान् । भूतानि । भीमान् ।
रुद्रान् । अन्तरिक्षान् रुद्रान् । दिव्यान्रुद्रान् ।
सर्वगतान् रुद्रान् । मातॄः योगीश्वरीम् । देवपत्नीः ।
देवमातृगणान् । धनाधिपान् । विनायकम् । मितम् ।

संमितम् । शालकटङ्कटी । कूष्माण्डम् । राजपुत्रान् ।
धर्मम् । अर्थम् । कामम् । गतिम् । निद्राम् । क्षुधाम् ।
अदितिम् । आयतिम् । नियतिम् । कीर्तिम् । प्रज्ञाम् ।
धृतिम् । मेधाम् । आकूतिम् । रुचिम् । श्रद्धाम् ।
वाणीम् । सरस्वतीम् । दक्षम् । दाक्षायणीम् । प्रजा-
पतीन् । सनकम् । सनातनम् । सनन्दम् । सनत्-
कुमारम् । क्रतुम् । पितृन् । ब्रह्मर्षीन् । देवर्षीन् ।
महर्षीन् । राजर्षीन् । ऋषिकान् । ऋषिपत्नीः ।
ऋषिपुत्रान् । गायत्रीम् । उष्णिहम् । अनुष्टुभम् ।
बृहतीम् । त्रिष्टुभम् । पङ्क्तिम् । जगतीम् । सर्वछन्दांसि ।
गरुडम् । अरुणम् । हव्यजालम् । सुरभिम् । दिङ्-
नागान् । उच्चैःश्रवसम् । धन्वन्तरीम् । भुवननागान् ।
दिङ्नागान् । कुलनागान् । विश्वकर्माणम् । वैश्रवणम् ।
ऋद्धिम् । नलकूबरम् । रैवतम् । शङ्खपद्मौ । नहुषपुत्रं
तत्पत्नीम् । तत्प्रजाम् । कश्यपं तत्पत्नीम् तत्प्रजाम् ।
प्रजापतिं तत्पत्नीं तत्प्रजाम् । चन्द्रं तत्पत्नीं तत्प्रजाम् ।
अरिष्टनेमिं तत्पत्नीं तत्प्रजाम् । कृशानुम् । आपाम् ।
अजाम् । अस्त्राणि । शास्त्राणि । ऋग्वेदम् । यजुर्वेदम् ।
सामवेदम् । अथर्ववेदम् । इतिहासम् । पुराणम् ।
धनुर्वेदम् । गान्धर्ववेदम् । आयुर्वेदम् । फलवेदम् ।

ज्योतिषम् । शिक्षाम् । कल्पम् । व्याकरणम् । निरुक्तम् ।
छन्दोविचितम् । धर्मशास्त्राणि । भारतम् । मनुम् । विष्णुम् ।
यमम् । अङ्गिरसम् । वसिष्ठम् । नारदम् । दक्षम् । संवर्तम् ।
शातातपम् । पराशरम् । आपस्तम्बम् । औशनसम् ।
कृष्णद्वैपायनम् । कात्यायनम् । बृहस्पतिम् । गौतमम् ।
शङ्खम् । लिखितम् । हारीतम् । अत्रिम् । याज्ञवल्क्यम् ।
अथ भगवन्तं धर्मम् । उत्तानपादम् । यज्ञम् । नारायणम् ।
नासत्यम् । वरुणार्यमाणौ । संवत्सरम् । मित्रम् ।
इन्द्राग्नी । मरीचिकश्यपौ । ध्रुवम् । अगस्त्यम् । धातारम् ।
मार्तण्डम् । रामम् । वाल्मीकिम् । महाकल्पम् । कल्पम् ।
मन्वन्तरम् । वर्तमानमिन्द्रम् । औजस्विनम् । स्वायंभुवम् ।
स्वारोचिषम् । औत्तमम् । तामसम् । रैवतम् । चाक्षुषम् ।
महातेजसम् । वैवस्वतम् । अर्कसावर्णिम् । ब्रह्मसावर्णिम् ।
रुद्रसावर्णिम् । दक्षसावर्णिम् । धर्मसावर्णिम् । रौच्यम् ।
भौत्यम् । युगम् । वर्तमानं संवत्सरम् । वर्तमानमयनम् ।
वर्तमानमृतुम् । वर्तमानं मासम् । वर्तमानं पक्षम् ।
वर्तमानमादित्यम् । सोमम् । कुजम् । बुधम् । जीवम् ।
शुक्रम् । शनैश्चरम् । राहुम् । केतुम् । ऋक्षाणि ।
वर्तमानं दिवसम् । वर्तमानं रात्रिम् । संध्ये । किंपुरुषान् ।
सर्वाणि भूतानि । देवानुचरान् । देवानुगान् । ॐ एक-
ज्योतिषम् । द्विज्योतिषम् । त्रिज्योतिषम् । चतुर्ज्योतिषम् ।

एकशक्रम् । द्विशक्रम् । त्रिशक्रम् । इन्द्रम् । आपो-
दृशम् । नभः । प्रविशाक्यम् । मितम् । सम्मितम् ।
ऋतुजितम् । सत्यजितम् । सुषेणम् । सेनजितम् । अति-
मित्रवामित्रम् । पुरुषामित्रम् । धृतम् । ~~[illegible]~~ ।
धर्तारम् । विधर्तारम् । वरुणम् । ध्रुवम् । धातारम् ।
विधातारम् । ईदृशम् । एतादृशम् । सदृशम् । प्रतिसदृशम् ।
अमृताशिनम् । प्रीतिनम् । युगम् । वृक्षम् । सरसमतिम् ।
धन्वन्तरिम् । उग्रम् । धुनिम् । भीमम् । अतियुक्तम् ।
ऋक्षपादम् । सहम् । द्युतिम् । वायुम् । अधृष्यम् । वासम् ।
कासम् । जयम् । विजयम् । इत्येकोनपञ्चाशन्मरुतः ।
भुवनम् । भावनम् । पर्जन्यम् । स्वजन्यम् । क्रतुम् ।
वसुम् । मूर्धानम् । वाजम् । वाजस्तवम् । प्रस्तवम् ।
आप्यायनम् । ऋक्षम् । इति द्वादशभृगून् ॥ मनुम् ।
मन्वन्तरम् । प्राणम् । चित्तिम् । छयम् । मयम् ।
हंसम् । नरम् । नारायणम् । विभुम् । प्रभुम् । इति
द्वादशसाध्यान् ॥ सवितारम् । धातारम् । मित्रम् ।
अर्यमणम् । पूषणम् । अंशुम् । त्वष्टारम् । विवस्वन्तम् ।
इन्द्रम् । विष्णुम् । वरुणम् । भगम् । इति द्वादशादित्यान् ।
पावकम् [पिनाकिनम् । मृगव्याधम् । सर्पम्] सूर्यम् ।
निर्ऋतिम् । हरम् । अजैकपादम् । अहिर्बुध्न्यम् । धूमकेतुम् ।

कपालिनम् । इत्येकादशरुद्रान् । आत्मानम् । अजमनम् ।
त्र्यक्षम् । सत्यम् । इति द्वादशाङ्गिरसः । क्रतुम् । दक्षम् ।
वसुम् । सत्यम् । कालम् । कामम् । धुरिम् । रोचनम् ।
मार्द्रवम् । पुरूरवसम् । इति दश विश्वान्देवान् । धरम्
ध्रुवम् । सोमम् । आपम् । अनलम् । अनिलम् । प्रत्यूषम् ।
प्रभासम् । इत्यष्टौ वसून् । नासत्यं दस्रमित्यश्विनौ ।
एतान् देवगणान् सानुचरान् । स्वायंभुवम् । सावित्रीम् ।
सर्वान्देवान् । सतीम् । देवीम् । लक्ष्मीम् । धराम् ।
अनिरुद्धम् । प्रद्युम्नम् । संकर्षणम् । वासुदेवम् ।
भूर्लोकम् । भुवर्लोकम् । स्वर्लोकम् । महर्लोकम् । जन-
लोकम् । तपोलोकम् । सत्यलोकम् । ब्रह्माण्डम् । पृथिवीम् ।
अपः । वह्निम् । वायुम् । आकाशं । मनः । बुद्धिम् ।
आसनम् । अव्यक्तं पुरुषं तर्पयामीति । इदं चान्ते
प्रत्यृचं पुरुषसूक्तेनाञ्जलीन्दद्यात् पुष्पाञ्जलिं च
भक्त्या । अथ कृतापसव्यो दक्षिणाभिमुखोऽनतजानुः
पित्र्येण तीर्थेन पितॄणां यथाश्राद्धं यथाप्रकाशमुदकं दद्यात् ।
सौवर्णेन पात्रेण राजतेनौदुम्बरेण खड्गपात्रेण वा ।
शाकुनाप्युदकं पितृतीर्थं स्पृशन्दद्यात् । पित्रे पितामहाय
प्रपितामहाय मात्रे पितामह्यै प्रपितामह्यै वा ।

[मातामहाय प्रमातामहाय वृद्धप्रमातामहाय मातामही प्रमातामही वृद्धप्रमातामहीश्च । आसप्तमात्पुरुषात् पितृपक्षे यावत्तां नाम जानीयात् । पितृपक्षाणामुदक-तर्पणं कृत्वा गुरूणां कुर्यात् । गुरूणां कृत्वा मातृ-पक्षाणां कुर्यात् । मातृपक्षाणां कृत्वा सम्बन्धि-बान्धवानां कुर्यात् । तेषां कृत्वा सुहृदां कुर्यात् । भवति चात्र वचनम् ।

विनारूप्यसुवर्णेन विना ताम्रतिलेन च ।
विनादर्भैश्च मन्त्रैश्च पितॄणां नोपतिष्ठते ॥
सौवर्णराजताभ्यां तु खड्गेनौदुम्बरेण वा ।
दत्तमक्षय्यतां याति पितॄणां तु तिलोदकम् ॥
हिमेन सह यद्दत्तं क्षीरेण मधुनाथवा ।
तदप्यक्षयतां याति पितॄणां च तिलोदकम् ॥

२८९ श्राद्ध: अक्षय्यमस्त्विति प्रोक्तः प्रत्येकं पितृतः क्रमात् ।

२९० श्राद्ध: पित्रेण पितॄन् ।
राजते मनसा पायात् सौवर्णे हस्तनिर्गतम् ।

२९१ श्राद्ध: " ततः सम्मार्जने जले " ।

292 शङ्खलिखितौ

नेष्टकाचिते पितॄंस्तर्पयेत् । वापीतडागोदपानेषु सप्त पञ्च त्रीन्वा पिण्डानुद्धृत्य देवपितॄंस्तर्पयेत् ।

293 शङ्खः उदकेनोदकं कुर्यात्पितृभ्यश्च कदाचन ।
उत्तीर्य च शुचौ देशे कुर्यादुदकतर्पणम् ॥

294 शङ्खः स्नातः सन्तर्पणं कृत्वा पितॄणां तु तिलाम्भसा ।
पितृलोकमवाप्नोति प्रीणाति च यथा पितॄन् ॥

295 शङ्खः 'कायं कनिष्ठिकामूलम्', कनिष्ठामूलस्य कायं प्राजापत्यं दैवमिति, 'तर्जन्यङ्गुष्ठमध्यस्य पित्र्यम्'। 'अङ्गुष्ठमूलस्य ब्राह्मम्' अङ्गुल्यग्रस्थ दैवम् आर्षम्। हस्तमध्यस्था आग्नेयं ब्राह्मम् ।

296 शङ्खः कायं कनिष्ठिकामूले तीर्थमुक्तं द्विजस्य तु ।
अङ्गुष्ठमूले च तथा प्राजापत्यं प्रकीर्तितम् ॥

297 शङ्खलिखितौ

उभाभ्यामपि हस्ताभ्यां प्राङ्मुखो यज्ञोपवीती प्रागग्रैः कुशैर्देवतातर्पणं देवतीर्थेन कुर्यात् ।

२९८ शङ्खः उभाभ्यामपि हस्ताभ्यामुदकं यः प्रयच्छति ।
स मूढो नरकं याति कालसूत्रमवाक्शिराः ॥

२९९ शङ्खः आब्रह्मस्तम्बपर्यन्तं जगत्तृप्यत्विति क्रमात् ।
जलाञ्जलित्रयं दद्यादेतत्संक्षेप तर्पणम् ॥

३०० शङ्खः एवं यः सर्वभूतानि तर्पयेदन्वहं द्विजः ।
स गच्छेत्परमं स्थानं तेजोरूपमनामयम् ॥

३०१ शङ्खः पूर्वाग्रैस्तर्पयेद्देवानुदगग्रैश्च मानवान् ।
तानेव द्विगुणीकृत्य तर्पयेत्प्रयतः पितॄन् ॥

३०२ ~~शङ्खलिखितौ~~ लिखितः शुष्केणान्तर्जले चैव बहिरप्यार्द्रवाससा ।
स्नानं दानं जपो होमो निष्फलं पितृतर्पणम् ॥

३०३ शङ्खः श्राद्धे विवाहकाले च पाणिनैकेन दीयते ।
तर्पणे तूभयेनैव विधिरेषः सनातनः ॥

३०४ शङ्खः एकैकमञ्जलिं देवा द्वौ द्वौ तु सनकादयः ।
अर्हन्ति पितरस्त्रींस्त्रीन् स्त्रियस्त्वेकैकमञ्जलिम् ॥

305 शङ्खः नोदकेषु न पात्रेषु न क्रुद्धो नैकपाणिना।
नोपतिष्ठति तत्तोयं यच्च भूमौ प्रदीयते॥

306 शङ्खः नामतस्तु स्वधाकारैस्तर्प्याः स्युरनुपूर्वशः।

307 शङ्खः स्नानमाचमनं दानं देवतापितृतर्पणम्।
शूद्रोदकैर्न कुर्वीत तथा मेघाद्विनिसृतैः॥

[पञ्चमहायज्ञाः]

308 शङ्खः पञ्चसूना गृहस्थस्य चुल्लीपेषण्युपस्करः ।
कण्डनी चोदकुम्भश्च तस्य पापस्य शान्तये ॥

309 शङ्खः पञ्चयज्ञविधानं तु गृही नित्यं न हापयेत् ।

310 शङ्खः शेषभुग् पञ्चमहायज्ञानहरहर्निर्वपेदापत्रशाको-
दकेभ्यः ।

311 शङ्खलिखितौ
अत ऊर्ध्वं देवयज्ञः सर्वेषामुपदिश्यते । आश्रम-
धर्मविरोधेन प्रीतिनियतामौषधीनां कोद्रवचणक-
माषमसुरोद्दालककुलत्थवर्ज्यं निर्वपणीयम् ।
तण्डुलान्वा प्रातः पत्न्यै दद्यात् । स्वयं वाधिश्रयेत् ।
सुसंमृष्टगृहद्वारोपलेपनधूपजाप्यप्रयतो नियतः
सायं प्रातरन्नादावश्यकानि कुर्यात् । अग्नये जात-
वेदसे स्वाहेत्यग्नौ । तूष्णीं द्वितीयाम् । उदुत्यं
जातवेदसमित्यादित्यमुपतिष्ठेत् ।

312 शङ्खलिखितौ
ब्रह्मणे नम इति ब्रह्मस्थले बलिं हरेत् । सोमयेत्युदकुम्भे।

वायव इति वास्तुगृहे । गृहपतय इति गृहद्वारे ।
प्रजापतय इति गर्भगृहे । ब्राह्मी देवीरित्यग्निकार्ये ।
दिक्पतिभ्यस्तेभ्यस्तत्पुरुषेभ्य इति पश्चिमार्धे ।
सोमाय सोमपुरुषेभ्य इत्युत्तरार्धे । ब्राह्मणे ब्रह्मपुरुषेभ्यः
प्रतिदिशम् । नक्षत्रग्रहदेवताभ्योऽन्तरिक्षे । सवितः पशूनां
पतये । नमो देवेभ्य इति प्रागुदीच्याम् । ब्रह्मस्थले
स्वधा पितृभ्य इति दक्षिणेन निवाप्य गोदोहमात्रं
कालमन्यकाङ्क्षेदतिथिम् ।

313 शङ्खमनुशातातपाः

एकमप्याशयेद्विप्रं पित्रर्थे पाञ्चयज्ञिके ।
न चैवात्राशयेत्किञ्चिद्वैश्वदेवं प्रति द्विजम् ॥

314 शङ्खमनुशातातपाः

दद्यादहरहः श्राद्धमन्नाद्येनोदकेन च ।
पयो मूलफलैर्वापि पितृभ्यः प्रीतिमाहरन् ॥

315 शङ्खः अन्नं व्याहृतिभिर्हुत्वा तथा मन्त्रैश्च शाकलैः ।
प्र(सु)विभज्य च भूतेभ्यस्ततोऽश्नीदनग्निमान् ॥

316 शङ्खलिखितौ

अतिथिः श्रोत्रियो वेदव्रती यतिधर्मा नैष्ठिकः समान-
वृत्तिर्योऽन्यो वाऽभ्यागच्छेत्तस्मिन्काले तमर्चयित्वाऽश्नीयात् ।

कुशावृत्तेरपि ब्राह्मणो [4]ह्यनश्नन् सुकृतमादत्ते ।
पर्यश्नतः [5]प्रजाः वृज्जाति ।

प्रार्थयन्ते तथा सर्वे निपानं मृगपक्षिणः ।
एवं गृहस्थं संपन्नं प्रार्थयन्तीह साधवः ॥

नावमन्येत विद्वांसं ब्राह्मणम् । ब्राह्मणो ह्यग्निरिवाप्रमेयः सर्व एव । यथा प्रणीतश्चाप्रणीतश्चाग्निर्हि दैवतमेवं विद्वांश्चाविद्वांश्च ब्राह्मणः पूज्य एव सर्वेषाम् । यत्र हि ब्राह्मणो न भुङ्क्ते तद्धुतमप्यग्नावहुतमेवास्य तद्धविः । तत्र देवा अपि न गह्णन्ति स्वं भागम् । अतिदेवा हि ब्राह्मणाः । ब्राह्मणानां प्रसादाद्देवा अपि स्वर्गमजयन् ।

[6]वयोवर्णविद्यातपः संपन्नाय पाद्यमर्घ्य[7]माचमनीयमन्नविशेषान् तस्मै [8]शक्तितो दद्यात् । [9][प्रियप्रश्नोत्तरेण] सहासीत [यानवन्तमायानारोहणाद्यानवन्तमनुज्ञापर्यन्तमननुज्ञाने आसीमान्तमनुव्रज्य विसर्जयेत् । यदि तत्रैव वस्तुमिच्छेत् तदा शय्यादिना शयनोपकरणेन पूजयेत् ।] प्रदोषेऽनुज्ञाप्य शयीत । पूर्वं प्रतिबुध्येत । प्रस्थितमनुव्रजेत् । [10]समेत्य न्यायतो निवर्तेत । [11]वेद्युद्यानारामसभा[12]प्रपातडागदेवगृहमहा[13]द्रुमस्थाननदीनामन्यतर[14]स्मिंस्तं प्रदक्षिणं कुर्याद् वाचमुत्सृज्य पुनर्दर्श[15]नायेति

317 शङ्खलिखितौ

देवान्भृत्यातिथींश्चैव पितॄनात्मानमेव च ।
प्रकृतान्नावमन्येत तेषां शिष्टं समश्नुयात् ॥

318 शङ्खलिखितौ

अब्राह्मणोऽतिथिर्ब्राह्मणस्य श्रोत्रियाय गुणवते आतिथ्यम् । राजन्यवैश्याभ्यां मित्रवत् । शूद्रस्यानृशंस्यार्थम् ।

319 शङ्खलिखितौ

हविरित्येवं साङ्गुष्ठमन्नविधिं ब्राह्मणेभ्यो दद्यात् ।

320 शङ्खः न यज्ञैर्दक्षिणावद्भिः बह्निः शुश्रुषया तथा ।
गृही स्वर्गमवाप्नोति यथा त्वतिथिपूजनात् ॥

321 शङ्खः वृत्तन्तु न त्यजेद्विद्वान्पूर्वमेव संदर्जितम् ।
कर्मणा जन्मना शुद्धमिज्ययाध्ययनेन च ॥

[भोजनविधिः]

३२२ शाङ्खः पञ्चार्द्रो भोजनं कुर्याद्भूमौ पात्रं निधाय च।
उपवासेन तत्तुल्यं मनुराह प्रजापतिः ॥

३२३ शाङ्खः उपलिप्ते शुचौ देशे पादौ प्रक्षाल्य वै करौ।
आचम्यार्द्राननोऽक्रोधः पञ्चार्द्रो भोजनं चरेत् ॥

३२४ शाङ्खलिखितौ
श्रुतिस्मृतिसमापन्नं देवद्रव्यगुणान्वितम्।
देवतार्थैर्यथा क्लृप्तं प्रोक्षितं शिष्टभोजनम् ॥

३२५ शाङ्खः परशौचे च यो भुङ्क्ते कृमियोनौ प्रजायते।
भुक्त्वान्नं म्रियते यस्य तस्य जातौ प्रजायते ॥

३२६ शाङ्खः भक्ष्यं भोज्यं तथा पेयं यत्किञ्चित्पच्यते गृहे।
न भोक्तव्यं तत्पितॄणामनिवेद्य कदाचन ॥

३२७ शाङ्खः आदित्या वसवो रुद्रा ब्रह्मा चैव पितामहः।
मण्डलान्युपजीवन्ति तस्मात्कुर्वीत मण्डलम् ॥

३२८ शाङ्खः चतुष्कोणं द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य तु।
मण्डलाकृति वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतम् ॥

337 शङ्खः भीतरुदिताक्रन्दितावकुष्टक्षुतपरिभुक्तविस्मितो-न्मत्तोन्मत्तावधूतराजपुरोहिताञ्चानि वर्जयेत् ।

338 शङ्खलिखितौ न श्राद्धं भुक्त्वा न हत्वा नामन्त्रितः श्राद्धे न व्रती न दीक्षितश्च, [दीक्षितत्वमवभृथेष्टिपर्यन्तं,] न देवायतनश्मशानशून्यालयेषु न वृक्षमूले न दिवा न सन्ध्ययोः ।

339 शङ्खलिखितौ आपणीयं कृतान्नमश्नीयान्नो भुक्तं पर्युषितं चान्यत्र रागषाडवदधिगुडगोधूमयवपिष्ट-विकारेभ्यः ।

340 शङ्खलिखितौ न भोजनार्थी पाकशालां प्रविशेत् । न वृथा पाकं पाचयेत् । न वृथापाकमश्नीयात् ।

341 शङ्खः कलिङ्गं च पटोलं च वृन्ताकं सन्धितानि च ।
उपोदकी रक्तशाकमेतान्वै वर्जयेद्द्विजः ॥

342 शङ्खः सुराकशुनपलाण्डुगृञ्जनमांसादीन्यभक्ष्याणि च वर्जयेदाहारमयं हि शरीरं तन्मयत्वात् ब्राह्मणः संकीर्यते । मातुरविशालपीतादिभिर्गर्भः संभवति ।

३२९ शङ्खः अशूद्रात्तु धनं भिक्षेत्सर्वं दद्याच्च भिक्षितम् ।

३३० शङ्खः पङ्क्तिविदात्मने गेहे भक्ष्यं वाऽभक्ष्यमेव वा ।

३३१ शङ्खः यातुधानाः पिशाचाश्च असुरा राक्षसास्तथा ।
हरन्ति रसमन्नस्य मण्डलेन विवर्जितम् ॥

३३२ शङ्खः अपूपाः सक्तवो धानास्तक्रं दधि घृतं मधु[1] ।
[2]एतत्पण्येषु भोक्तव्यं [3]भाण्डलेपो न चेद्भवेत् ॥

३३३ शङ्खः अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितम् ।
अस्नेहा अपि गोधूमयवगोरसविक्रियाः ॥

३३४ शङ्खः दधि [1]भक्ष्यं [2]च शुक्तेषु सर्वं च दधिसंभवम् ।
ऋजीषपक्वं भक्ष्यं स्यात्सर्पिर्युक्तमिति स्थितिः ॥

३३५ शङ्खः अपूपाश्च करंभाश्च धानावटकसक्तवः ।
शाकं स्निग्धमपूपं च सूपं कृसरमेव च ॥
यवागूः पायसं चैव यच्चान्यत्स्नेहसंयुतम् ।
सर्वं पर्युषितं भोज्यं शुक्तं चेत्परिवर्जयेत् ॥

३३६ शङ्खलिखितौ
विद्विषाणस्य नाश्नीयात् [1]ब्रह्मच्छिद्रापकारिणाम् ।
श्राद्धसूतगणान्नानि परिभूतानि यानि च ॥

एकेन पाणिना दत्तं शूद्रदत्तं न भोजयेत् ।
घृतं तैलं च लवणं पानीयं पायसं तथा ॥
हस्तदत्ताश्च ये स्नेहलवणव्यञ्जनानि च ।
दातारं नोपतिष्ठन्ति भोक्ता भुञ्जीत किल्बीषम् ॥

343 शङ्खः
भक्ष्याः पञ्चनखाश्चैव गोधाकच्छपशल्यकाः ।
खड्गश्च शशकश्चैव तान्भुक्त्वा नाचरेद्व्रतम् ॥

344 शङ्खः
द्विपक्वान्ननिषेधः स्यात्प्रवादस्मरणाद्यदि ।
घृतं वा यदि वा तैलं विप्रैर्नाद्यं नखच्युतम् ।
यमस्तदशुचिं प्राह तुल्यं गोमांसभक्षणम् ॥

345 शङ्खः
उत्पलं च वटं चैव शणशाकं तथैव च ।
प्लक्षाश्वत्थोदुम्बराणि श्रेयोर्थी वर्जयेत्सदा ॥

346 शङ्खः
तित्तिरं च मयूरं च लावकं च कपिञ्जलम् ।
वाध्रीणसं वर्तिकं च भक्ष्यानाह यमः सदा ॥

347 शङ्खः
माहिषं त्वाजमौरभ्रं मार्गं रौरवमेव च ।
भक्ष्यं मांसं समुद्दिष्टं यच्च वै पार्षतं भवेत् ॥
वराहांश्च तथा भक्ष्यानाहारण्यनिवासिनः ।

348 शङ्खः
गृहाश्वरथभूम्यर्थे गवार्थे च विशेषतः ।
श्रोत्रियेणापि भोक्तव्यं शूद्रान्नं तु यमोऽब्रवीत् ॥

349 शङ्खः उच्छिष्टलेपसंस्पर्शे प्रक्षाल्यान्येन वारिणा ।
भोजनान्ते नरः स्नात्वा गायत्रीं त्रिशतं जपेत् ॥

[भोजनोत्तरं पुराणश्रवणम्]

350 लिखितः भुक्त्वोपस्थाय मार्तण्डं पुराणानि सदा पठेत् ।
भावशुद्ध्या हरौ भक्तिः पुराणश्रवणाद्भवेत् ॥

351 शङ्खः विचार्य च पुराणार्थान्वेदार्थान्भक्तिमास्थितः ।
विष्णुं सदा हृदि ध्यायेत्सकलं निष्कलं तु वा ॥

[शयनम्]

352 शङ्खलिखितौ न [1]विशीर्णखट्वायां नान्य[2]वर्णोपसेवितायामनु-
भुज्य [3]भूतयक्षमहायतनेषु न श्मशान[4]वल्मीक-
महावृक्षच्छा[5]यासु न पर्वणि रभसोत्सवे [6]वा ।

353 शङ्खः मृतदन्तमये विदग्धे दर्भपलाशजे
न शयीत नरो धान्ये शयने पञ्चदारुजे ॥

354 शङ्खलिखितौ
त्रयाणामपि [1]वर्णानां पूर्वरात्रे [2]प्रजागरः ।

शुद्धिप्रकरणम्

[स्वभावशुद्धानि]

355 शङ्खः पर्षदानुमतस्सम्यगेनो विख्याप्य तत्त्वतः ।
यद्ब्रूयुस्तद्वि-धानज्ञास्तच्छुद्धिकरमुत्तमम् ॥

356 शङ्खलिखितौ
शुद्धं नदीगतं तोयं सर्व एव तथाकराः ।
शुद्धं प्रसारितं पण्यं शुद्धमश्वो जयोन्मुखः ॥
मुखवर्जं च गौः शुद्धा मार्जारः क्रमणे शुचिः ॥

357 शङ्खः परतः परतः शुद्धिरघवृद्धौ विधीयते ।
स्याच्चेत्पश्चात्मादह्नः पूर्वेणैव विशुद्ध्यति ॥

358 शङ्खः गोपुरीषञ्च मूत्रं च नित्यं मेध्यमिति स्थितिः ।

359 शङ्खलिखितौ
मृदद्भिः संहतानाम् । द्रव्याणामुत्पवनम् ।
शुष्काणामुद्धृतदोषाणां संस्कारः परिप्लावितानां
दोषाणां त्यागः ॥

360 शङ्खलिखितौ
आपो रूपरसगन्धवत्यः परिशुद्धाः
जीर्णचर्मकरण्डैरभ्युद्धृता भूमिगता
मेध्या यत्र गौर्वितृष्णा भवेत् ।

361 शङ्खः नारीणां चैव वत्सानां शकुनीनां शुनां मुखम् ।
रतौ प्रस्रवणे वृक्षे मृगयायां सदा शुचि ॥

362 शङ्खः आकराः शुचयः सर्वे शकुनिः फलपातने ।
श्वामृगग्रहणे मेध्यः स्त्रीमुखेषु च वारुणी ॥

363 शङ्खः कृष्णशकुनिमुखावसृष्टं निर्लिखेच्छ्वापदमुखा-
वसृष्टं पात्रं न प्रयुञ्जीत ।

364 शङ्खः घृतदधिपयस्तक्राणामाकरभाण्डस्थितानामदोषः ।

365 शङ्खलिखितौ बालस्त्रीपरिगतान्यगारेषु दुष्यन्ति धूमाग्नि-
रजांसि वाटवीरितानि विप्रुषः छाया मक्षिका
इति स्पर्शे मेध्याः ।

[शारीरशुद्धिः]

366 शङ्खलिखितौ आत्मयोजिनां शारीरस्याद्भि-र्मृद्भिश्च ज्ञानेन बुद्धे-
स्तपसा पापात्मनाम् । सन्तानजातानां मातृपैतृकाणां
दोषाणां यमनियममन्त्रव्रतोपवासादिनां शुद्धिः ।

367 शङ्खः शक्तितश्च शरीरं शोषयेद्यमनियममन्त्रव्रतादिभिः ।

द्रव्यशुद्धिः

[पात्राणां शुद्धिः]

368 शङ्खः मलसंयोगजं तज्जं यस्य येनोपहन्यते ।
तस्य तच्छोधनं[1] प्रोक्तं सामान्यं द्रव्यशुद्धिकृत्[2] ॥

369 शङ्खः उष्णोदकेन कांसस्य[1] सीसस्य त्रपुणस्तथा ।
क्षारेण शुद्धिं[2] कांस्यस्य लोहस्य च विनिर्दिशेत् ॥

370 शङ्खः लोहानां दहनाच्छुद्धिर्भस्मना गोमयेन वा[3] ।
दहनात्खननाद्वापि शैलानामम्भसापि वा ॥
काष्ठानां तक्षणाच्छुद्धिर्मृद्गोमयजलैरपि ॥

371 शङ्खः गण्डूषं पादशौचं च यः कुर्यात्कांस्यभाजने ।
भूमौ निक्षिप्य षण्मासं पुनराकरमादिशेत् ॥

372 शङ्खः सूतिकोच्छिष्टभाण्डस्य सुरामद्य[1]हतस्य च ।
त्रिः संप्रमार्जनाच्छुद्धिर्न[2][3] तु कांसस्य तापनम्[4] ॥

373 शङ्खव्यासौ सूतकादि परिच्छेदो दिनमासाब्दपास्तथा ।
मध्यमाङ्गुलिश्च सावनेन प्रकीर्तिताः ॥

374 शङ्खः च्युतेष्वासावधिधाम्निगिरन्नेव तच्छुचिः ।

375 शाङ्खः तैजसानां कुणप[1]रेतोमूत्रपुरीषोपहतानामावर्तनमु-
ल्लेखनं भस्मना वा[2] त्रिः सप्तकृत्वः[3] परिमार्जनम् ॥

[यज्ञपात्रादीनां शुद्धिः]

376 शङ्खलिखितौ
चमसानामद्भिर्यज्ञसामवायिकशौचम् । अध्वरेषु
चमसवद्यतिपात्राणाम् । यतिसमयमाम्नायतः सोदकानां
परिघर्षणम् ।

377 शाङ्खः पर्णानां प्र[1]क्षालनमेव सकृदुपयुक्त[2]कानामुत्सर्गः ।
पुष्पमूल[3]फलानां च विष्किरावधूतानां प्रो[4]क्षणम् ।
अभ्युक्षणमित्येके ।

[मृण्मयपात्रादीनां शुद्धिः]

378 शाङ्खः मद्यैर्मूत्रपुरीषैश्च श्लेष्मपूयाश्रुशोणितैः ।
संस्पृष्टं नैव शुद्ध्येत्तु पुनः पाकेन ~~मृण्मयम्~~ [1] शुध्यति ॥
एतैरेव च[2] संस्पृष्टं ताम्रसौवर्णराजतम् ।
अत्यन्तोपहतानां च परित्यागो विधीयते ॥

[शुचिद्रव्याणि]

379 शाङ्खः सर्वेषामापो मृदरिष्टकङ्गुदबिल्वपत्रतण्डुलसर्षप-
कल्कक्षारगोमूत्रगोमयादीनि शौचद्रव्याणि । अहतानां
प्रोक्षणमित्येके ।

380 शङ्खः राग(?)द्रव्याणि प्रोक्षितानि शुचीनि ।

381 शङ्खः ब्रह्मक्षत्रविशां चैव सकृत्संमार्जनाच्छुचिः ।
चतुर्थेन तु यद्युक्तं चतुर्भिर्यत्र मार्जनम् ॥
अग्नौ प्रक्षिप्य गृह्णीयाच्छूद्रो प्रक्षाल्य यत्नतः ।
गोशृङ्गेण तु संस्पृष्टं तत्पात्रं शुचितामियात् ॥

[रजस्वलास्पर्शे शुद्धिः]

382 शङ्खः रजस्वलास्पृष्टानामेकदिनं पञ्चगव्यं प्रक्षिप्य
एकविंशतिकृत्वः संमार्जनाच्छुद्धिः ।

[उदकशुद्धिः]

383 शङ्खः कूपे तु पतितौ दृष्ट्वा श्वशृगालौ च मर्कटम् ।
अस्थिचर्मादिपतनं पीत्वा शुध्येत्त्रिरात्रतः ॥

384 शङ्खलिखितौ भूमिष्ठमुदकं शुद्धं शुचि तोयं शिलागतम् ।
गन्धवर्णरसैर्दुष्टैर्वर्जितं यदि तद्भवेत् ॥

385 शङ्खः चक्राङ्कितः सदा तिष्ठेन्मद्भक्तः सर्वदा शुचिः ।

[देशशुद्धिः]

386 शङ्खलिखितौ कर्षणमुपलेपनमद्भिरभ्युक्षणं कालो दाहश्च भूमेः (शुद्धिः) ।

३८७ शङ्खः शयनासनयानानां[1] संहतवच्छौचम्[2] ।

३८८ शङ्खः आत्मशय्यासनं वस्त्रं जायापत्यकमण्डलुः ॥
शुचीन्यात्मन एतानि परेषामशुचीनि तु ॥

[चेलादिशुद्धिः]

३८९ शङ्खः चाण्डालेन सहाध्वगमने सचेलस्नानम् ।

३९० शङ्खलिखितौ
द्रव्यहस्त उच्छिष्टो निधायाचामेत् । अद्भिरभ्युक्ष्य द्रव्यं शुध्यति ।

३९१ शङ्खः मृद्भस्मगोमूत्रक्षारोदकशैलानां[1] चेलवद्धान्यामां
पक्ष्म[2]चामरचर्मतृणवालवेत्र[3]वल्कलादीनाम् ।

३९२ शङ्खः चेलानामुत्सेधनं तस्मादुच्छेदनं वा ।

[चर्मशुद्धिः]

३९३ शङ्खः त्रिदिनं भस्ममृद्वारि त्र्यहं त्रिफलमेव च ।
सप्ताहं सप्तकाषायैश्चर्मशुद्धिः परा स्मृता ॥

[प्रोक्षणेन शुद्धिः]

३९४ शङ्खः कारुहस्तः शुचिस्तथा कराः । तद्द्रव्याणि प्रोक्षिता[1]-
भ्युक्षितानि शुचीनि ।

395 शङ्खः निर्यासानां गुडानां च लवणानां तथैव च ।
कुसुम्भकुङ्कुमानां च ऊर्णाकार्पासयोस्तथा ॥
प्रोक्षणात्कथिता शुद्धिरित्याह भगवान्यमः ॥

[स्नेहादीनां शुद्धिः]

396 शङ्खलिखितौ आकरजानामभ्यवहरणीयानां[1] धृतेनाभिधारितानां[2] शुद्धिः[3] । पुनः पचनमेव[4] स्नेहानां स्नेहवद्[5]रसानाम् ।

[अशुद्ध्यपवादः]

397 शङ्खः आधारदोषे तु नयेत् पात्रात्पात्रान्तरं द्रव्यम् ।

398 शङ्खः घृतं तु[1] पायसं क्षीरं तथैवेक्षुरसो गुडः ।
शूद्रभाण्डस्थितं तक्रं तथा मधु न दुष्यति ॥

399 शङ्खः आभीरभाण्डसंस्थानि पयोदधिघृतानि च ।
तावत्पूतं हि तद्भाण्डं यावत्तत्तत्र तिष्ठति ॥

400 शङ्खः श्रपणं घृततैलानां प्लावनं गोरसस्य तु[1] ।
भाण्डानि प्लावयेदद्भिः[2] शाकमूलफलानि च ॥

401 शङ्खः रथ्याकर्दमतोयेन[1] ष्ठीवनाद्येन[2] वा[3] तथा ।
नाभेरूर्ध्वं नरः स्पृष्टः सद्यः स्नानेन शुध्यति ॥

402 शङ्खलिखितौ
स चेत्तस्यापन्नः शुद्धिमन्विच्छेत्तमेव जनमाहूय
राजानं अभिभाष्य गुणानुकीर्तनं कृत्वा शौद्धिकं
दधिमधुघृतजलाऽक्षतानां नवं पात्रं पूरयित्वा गन्ध-
माल्योपनीतं कृत्वा त्रिः प्रदक्षिणी कुर्युः। बान्धवाः
योषितश्च ततो महाव्याहृतिहोमान्ते तत्पात्रं अपां
मध्ये प्रवाहयेरन्। शान्तान्यशुभानि दुर्भाषिता-
नीति ब्रुवन्तः। ततः स्नात्वा शुचिः शुक्लवासाः
पुनर्गृहं प्रविशेत्। बान्धवाऽनुमतः स्त्रीणामप्येवं
परित्यागो दुष्टानां पुनरावाहनं च।

403 शङ्खलिखितौ
एकपतस्कन्नभावत्वात् परेन्द्रियोपहतत्वाच्च
दुष्टाः कुलसङ्करकारिण्यो भवन्ति।

404 शङ्खः
सिद्धमन्नं तथा सर्पिः क्षीरं च दधि चाम्बु च।
एतेषामवलीढानां तेजसा शुद्धिरिष्यते ॥
काकमार्जारनकुलसर्पमूषकपक्षिभिः।
संस्कृतं तु यदा ह्यन्नमवलिह्येत केनचित् ॥
सुवर्णवर्णताम्रौल्कैर्गोवालैरजतेन वा।
स्पृष्टमेकतरेणापि भोज्यं धातमजेन वा ॥

405 शङ्खः
सिद्धार्थानां कल्केन शृङ्गदन्तमयस्य च।
गोवालैः फलपात्राणामस्थ्नां स्याच्छङ्खवत्तथा ॥

दानप्रकरणम्

406 शङ्खलिखितौ

कृसरपायसापूपमांसदधिमधुघृतकृष्णाजिनानि शूद्रेभ्यो न दद्यान्नोपस्कृतं किञ्चिदन्यत्र प्रकृतात् ।

407 बोधायनशङ्खौ

ब्राह्मणक्षत्रियविट्शूद्रानभ्यागतान्यथा शक्त्या पूजयेद्यदि बहूनां न शक्नुयादेकस्मै गुणवते दद्याद्यो वा प्रथमागतः स्याच्छ्रोत्रियस्तस्मै दद्यात् ।

408 शङ्खलिखितौ

धर्मेण वित्तमादाय पितृभ्यो दद्यात् ।

409 लिखितयाज्ञवल्क्य :-

स्वर्गलोकमहितत्वकामो वा ।

श्राद्धप्रकरणम्

[श्राद्धाधिकारिणः]

410 शङ्खः पितुः पुत्रेण कर्त्तव्या पिण्डदानोदकक्रिया।
पुत्राभावे तु पत्नी स्यात्पत्न्यभावे तु सोदरः॥

411 शङ्खः भार्यापिण्डं पतिर्दद्याद्भर्त्रे भार्या तथैव च।
श्वश्र्वादेश्च स्नुषा चैव तदभावे सपिण्डकाः॥

412 शङ्खः अपुत्रायाः पतिर्दद्यात्सपुत्राया न तु क्वचित्।
पत्युः पिण्डं तथा भार्या भर्तृभार्ये परस्परम्॥

413 शङ्खः अपुत्रायाः पत्न्याः दुहितृसपत्नीपुत्रयोरभावे पति-
र्दद्यात्।
न जायाया पतिर्दद्यादपुत्राया अपि क्वचित्॥

414 शङ्खः अविभक्ता विभक्ता वा कुर्युः श्राद्धमदैवतम्।
मघासु च ततोऽन्यत्र नाधिकारः पृथग्विना॥

415 शङ्खः यद्येकजाता बहवः पृथक्क्षेत्राः पृथग्जनाः।
एकपिण्डाः पृथक्शौचाः पिण्डस्त्वावर्तते त्रिषु॥

416 शङ्खलिखितवसिष्ठहारिताः

लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः ।
पुत्रादीनां मुख्यत्वात्तदभावे वृद्धानाथास्तथा स्त्रियः ॥
तत्सपिण्डा बान्धवा वा ये तस्याः परिपन्थिनः ।
हिंस्युर्धनानि तान्राजा चौरदण्डेन शासयेत् ॥

[श्राद्धकालाः]

417 शङ्खः यदा विष्टिर्व्यतीपातो भानुवारस्तथैव च ।
पद्मकं नाम तत्प्रोक्तमयनाच्च चतुर्गुणम् ।

418 शङ्खः श्रवणाश्वी धनिष्ठार्द्रा नागदैवतमस्तके ।
यदामा रविवारेण व्यतीपातः स उच्यते ॥

419 शङ्खः हस्तिच्छायासु यद्दत्तं यद्दत्तं राहुदर्शने ।
विषुवत्ययने चैव सर्वमानन्त्यमुच्यते ॥

420 शङ्खः फलं लक्षं समुत्पत्तौ भ्रमणे कोटिरुच्यते ।
पतने शतकोट्यस्तु पाते वै दत्तमक्षयम् ॥

421 शङ्खः प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम् ।
प्राप्य श्राद्धं हि कर्तव्यं मधुना पायसेन च ॥

422 श्राद्ध: पूर्वाह्णे दैविकं कृत्यमपराह्णे पितृक्रिया।
गहणे मिश्रिता कार्या न रात्रौ पैतृकं पुनः॥

423 श्राद्ध: शुक्लपक्षे हि चन्द्रस्य वृद्धिर्भवति भास्करात्।
कृष्णपक्षे क्षयस्ताभ्यां तिथीनामपि तौ खलु॥

424 श्राद्ध: मुहूर्तत्रितयं प्रातस्तावानेव तु संगवः।
मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णश्च तादृशः॥
सायाह्नस्त्रिमुहूर्तः स्यात्सर्वकर्मसु गर्हितः॥

425 श्राद्ध: रौद्रश्चैत्रस्तथा मैत्रस्तथा शालकटस्मृतः।
2 सावित्रश्च जयन्तश्च 3 गान्धर्वः कुतपस्तथा॥
महेन्द्रो वरुणश्चैव 4 बोधः पञ्चदशास्मृतः। 4
रौहिणिश्च विरिंचश्च विजयो नैर्ऋतिस्तथा 3
[श्राद्धदेशाः]

426 श्राद्ध: गोगजाश्वादिपृष्ठेषु कृत्रिमायां तथा भुवि।
न कुर्याच्छ्राद्धमेतेषु पारक्यासु 2 च भूमिषु॥

427 श्राद्ध: म्लेच्छदेशे तथा रात्रौ सन्ध्यायां च विशेषतः।
न श्राद्धमाचरेत्प्राज्ञो म्लेच्छदेशं न च व्रजेत्॥

428 शङ्खः यद्ददाति गयास्थश्च प्रभासे पुष्करेषु च ।
प्रयागे नैमिषारण्ये सर्वमानन्त्यमुच्यते ॥

429 शङ्खः गङ्गायमुनयोस्तीरे भृगुतुङ्गे हिमालये ।
नर्मदाबाहुदातीरे सर्वमानन्त्यमुच्यते ॥

430 शङ्खः करुणां च कुरुक्षेत्रे भृगुतुङ्गे हिमालये ।
सप्तर्षे वृष्णिकूपे च दत्तमक्षय्यमुच्यते ॥

431 शङ्खलिखितौ कुरुक्षेत्रे गयातीर्थे तथा वामकन्दके ।
एवमादिषु तीर्थेषु दत्तमक्षयतामियात् ॥

432 शङ्खः गङ्गाद्वारे प्रयागे च नैमिषे पुष्करे तथा ।
सन्निहत्यां गयायां च दत्तमक्षय्यतां व्रजेत् ॥

433 शङ्खः अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः ।
गयाशीर्षे वटे श्राद्धं यो नो दद्यात्समाहितः ॥
एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यजेत चाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥

434 शङ्खः यत्र क्वचन नर्मदातीरे यमुनातीरे गङ्गायां
विशेषतो गङ्गाद्वारे प्रयागे गङ्गासागरसङ्गमे
कुशावर्ते बिल्वके नीलपर्वते । कुब्जाहे भृगुवृन्दे -

केदारे लिङ्गायां सुगन्धायां फाल्गुतीर्थे महागङ्गायां तण्डुलिकाश्रमे कुमारधारायां प्रभासे यत्र क्वचन सरस्वत्यां विशेषतो नैमिषारण्ये वाराणस्या- मगस्त्याश्रमे कण्वाश्रमे कौशिक्यां सरयूतीरे शोणायां भागीरथ्याश्च सङ्गमे श्रीपर्वते कलोदके उत्तरमानसे वडवायां सप्तर्षे विष्णुपदे स्वर्ग- प्रदेशे गोदावर्यां गोमत्यां वेत्रवत्यां विपाशायां वितस्तायां मरुद्वृधायां शतद्रुति चन्द्रभागायां इरा- वत्यां सिन्धोस्तीरे दक्षिणे पञ्चनदे औजसे चैव- मादिष्वन्येषु तीर्थेषु सरिद्वरासु पुष्करेषु प्रस्रवणेषु पर्वतेषु निकुञ्जेषु वनेषूपवनेषु च गोमयेनोप- लिप्तेषु मनोज्ञेषु च ।

435 शङ्खः स्थलीषु गिरिप्रस्थेषु तीर्थेष्वायतनेषु च ।
विविक्तेषु च तृप्यन्ति तृप्यन्तु पितरस्तथा ॥

436 शङ्खदेवलौ तीर्थद्रव्योपपत्तौ च न कालमवधारयेत् ।
पात्रं च ब्राह्मणं प्राप्य सद्यः श्राद्धं समाचरेत् ॥

437 शङ्खः पिण्याकैः सक्तुभिर्वापि गयाशीर्षे सकृन्नरः ।
यत्नात्मा पातयेत्पिण्डं तं नयेद्ब्रह्म शाश्वतम् ॥

438 श्राद्ध॰: श्राद्धं प्राहुरमावास्यां क्षीणसोमां द्विजोत्तमम्।
अष्टका च भवेत्पश्चं तत्र दत्तं तथाऽक्षयम् ॥

439 श्राद्ध॰: न स्रवन्तिमतिक्रामेदनवसिच्य।

440 श्राद्ध॰: कुलेऽस्माकं स जन्तुः स्याद्यो नो दद्याज्जलाञ्जलिम्।
नदीषु बहुतोयासु शीततालु विशेषतः ॥
नदी समुद्रतीरे वा ह्रदे गोष्ठे च पर्वते ।
समुद्रगानदीतीरे सिन्धुसागरसङ्गमे ।
नद्योर्वा सङ्गमे राजन्शालग्राम_शिलान्तिके।
शालग्रामे च गोकर्णे गयायां च विशेषतः॥
क्षेत्रेष्वेषु तु यः श्राद्धं पितृभक्तिसमन्वितः।
करोति विधिवन्मर्त्यः कृतकृत्यो विधीयते॥

441 श्राद्ध॰ मनुशातातपौ
कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा।
पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन् ॥

[मातृश्राद्धम्]

442 श्राद्ध॰: मातर्यपि च वृत्तायां श्राद्धं कुर्वीत पैतृकम्।
तस्यां न वत्सरं कुर्यात्प्रीते पितरि च क्वचित् ॥

443 श्राद्ध॰: पित्रादित्रयपत्नीनां भोज्या मातृः प्रति द्विजाः।
स्त्रीणामेव तु तस्मात्तु मातृश्राद्धमिहोच्यते ॥

[आमश्राद्धम्]

444 श्राद्धः आमश्राद्धाशने विद्वान्मासमेकं व्रतं चरेत् ।

445 श्राद्धः अमाश्राद्धं प्रकुर्वीत पूर्वं दद्यात्तिलोदकम् ।
प्रत्याब्दिके तथा मासि श्राद्धे दद्यात्परेऽहनि ॥

[पार्वणो विधिः]

446 श्राद्धः अमावास्या[1] क्षयो यस्य प्रेतपक्षेऽथवा यदि[2] ।
सपिण्डीकरणादूर्ध्वं तस्योक्तः पार्वणो विधिः ॥

[पार्वणैकोद्दिष्टविधानम्]

447 श्राद्धः पर्वकालो मृताहश्च यद्येकत्र द्वयं भवेत् ।
पार्वणं तत्र कर्तव्यं नैकोद्दिष्टं कदाचन ॥

448 श्राद्धः अन्वष्टका[1] तथा मातृश्राद्धं चैव मृताहनि ।
एकोद्दिष्टं तथा भुक्त्वा स्त्रीषु नान्यत्पृथग्भवेत् ॥

449 श्राद्धः श्राद्धद्रव्यमुपक्रम्य कुर्वीत सहपिण्डनम् ।
तयोः पार्वणवत्पूर्वमेकोद्दिष्टमथापरम् ॥

450 श्राद्धः नान्दीमुखे सत्यवसू संकीर्त्यौ वैश्वदेविके ।

[इष्टिश्राद्धम्]

451 शङ्खः इष्टिश्राद्धे क्रतुदक्षौ संकीर्त्यौ वैश्वदेविके ।
नान्दीमुखे सत्यवसू काम्ये च धूरिलोचनौ ॥
पुरूरवार्द्रवौ चैव पार्वणे समुदाहृतौ ।
नैमित्तिके कामकालावेवं सर्वत्र कीर्तयेत् ॥

452 शङ्खलिखितौ पिता पितामहश्चैव तथैव प्रपितामहः ।
भूयस्तत्रैव जायन्ते तदहर्वैदयाजि च ॥

[ब्राह्मणामन्त्रणम्]

453 शङ्खलिखितौ जन्मशरीरलक्षणगुणोपेतान् ब्राह्मणानामन्त्रयेत् ।
श्वोऽद्येति वा श्राद्धमाचरिष्ये ।

[अग्नौकरणम्]

454 शङ्खः अग्नौकरणशेषेण यदन्नमभिधारयेत् ।
तस्मिंस्तु प्राशिते दद्याद्यन्यत्सकृतं भवेत् ॥

455 शङ्खलिखितौ अथ पाङ्क्त्या वेदवेदाङ्गवित् पञ्चाग्निरनूचानो
ब्रह्मचारी श्रोत्रियस्त्रिणाचिकेतस्त्रिमधुस्त्रिसौपर्णो
ज्येष्ठसामगः सन्ध्यास्नायी वेदपरः सदाग्निको मातृपितृ-
शुश्रूषुधर्मशास्त्रविद्वद् ।

[ब्राह्मणाः पङ्क्तिपावनाः]

456 शङ्खः षडङ्गवित् त्रिसौपर्णो बह्वृचो ज्येष्ठसामगः।
त्रिणाचिकेताः पञ्चाग्निर्ब्राह्मणाः पङ्क्तिपावनाः॥

457 शङ्खः ब्रह्मदेयानुसन्तानो ब्रह्मदेयाप्रदायकः।
ब्रह्मदेयापतिश्चैव ब्राह्मणाः पङ्क्तिपावनाः॥

458 शङ्खः यजुषां पारगो यश्च साम्नां यश्चापि पारगः।
अथर्वशिरसोऽध्येता ब्राह्मणाः पङ्क्तिपावनाः॥

459 शङ्खः चान्द्रायणव्रतस्थो यः सत्यवादी पुराणवित्।
निवासः सर्वविद्यासु शान्तो विगतकल्मषः॥
गुरुवेदाग्निपूजासु शान्तो विगतकल्मषः॥

460 शङ्खः नित्यं योगपरो विद्वान् समलोष्टाश्मकाञ्चनः।
ध्यानशीलो यतिर्विद्वान् ब्राह्मणाः पङ्क्तिपावनाः।

[अपाङ्क्तेयाः]

461 शङ्खलिखितौ अनृतवाक्तस्करो राजभृत्यो भृत्यो वृषलीपतिः वृत्ति-
गरदोऽग्निदो माहिषिकश्छागलिकः शूद्रोपाध्यायो बन्दी
घाण्टिको देवलकः पुरोहितो नक्षत्रदेशवृत्तिर्ब्रह्मपुरुषो-
ऽपत्यविक्रयी कितवः कूटकारकमानुषपशुविक्रयिण-
श्चेत्यपाङ्क्तेयाः।

462 श्राद्ध: ब्राह्मणा ये विकर्मस्था बैडालवृत्तिकास्तथा।
हीनाङ्गा चाधिकाङ्गाश्च विज्ञेयाः पङ्क्तिदूषकाः॥

463 श्राद्ध: कुनखी श्यावदन्तश्च दुश्चर्मा वृषलीपतिः।
कुष्ठी च राजयक्ष्मी च ब्राह्मणाः पङ्क्तिदूषकाः।

464 श्राद्ध: अनध्यायेष्वधीयानाः शौचाचारविवर्जिताः।
शूद्रान्नरसपुष्टाङ्गा ब्राह्मणाः पङ्क्तिदूषकाः॥

465 श्राद्ध: गुरूणां प्रतिकूलाश्च वेदाग्न्युत्सादिनश्च ये।
गुरूणां त्यागिनश्चैव ब्राह्मणाः पङ्क्तिदूषकाः॥

[श्राद्धं न दातव्यम्]

466 श्राद्ध: अङ्गुष्ठमात्रसुषिरौ कर्णौ न भवतो यदि।
तस्मै श्राद्धं न दातव्यं यदीच्छेदासुरं भवेत्॥

[आसुरश्राद्धम्]

467 श्राद्ध: मातामहादिज्ञातींश्च स्वस्य ज्ञातींश्च वर्जयेत्।
गृह्णीत यदि कर्ता च भोक्ता च नरकं व्रजेत्॥
तच्छ्राद्धमासुरं लोके पितॄणां नोपतिष्ठते॥

[पितृस्थाने नियोजनम्]

468 शाङ्खलिखितौ ध्रियमाणे तु पितरि माता चेन्निधनं गता।
पितृस्थाने स्वपितरं तत्स्थानेऽन्यन्नियोजयेत्॥

[एकब्राह्मणपक्षे दैवव्यवस्था]

469 शङ्खः भोजयेदथवाप्येकं ब्राह्मणं पङ्क्तिपावनम्।
दैवे कृत्वा तु नैवेद्यं पश्चात्तस्य तु निर्वपेत्॥

470 शङ्खः यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत्।
अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य तु॥
देवतायतने कृत्वा यथाविधि निवेदयेत्।
प्रास्येदन्नं तदग्नौ तु दद्याद्वा ब्रह्मचारिणे॥

471 शङ्खः एक एव यदि विप्रो द्वितीयो नोपपद्यते।
पितॄणां ब्राह्मणो योज्यो दैवं (वे) त्वग्निं नियोजयेत्॥

[पवित्रलक्षणम्]

472 शङ्खः अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥

473 शङ्खः विरिञ्चिना सहोत्पन्न परमेष्ठी निसर्गज।
नुद सर्वाणि पापानि दर्भ स्वस्तिकरो भव॥

474 शङ्खः कर्मकाले प्रकुर्वीत सपवित्रामनामिकाम्।
लङ्घयेदेकपर्वास्या द्वितीयं नैव लङ्घयेत्॥

[ब्राह्मणप्रार्थना]

475 शङ्खलिखितौ प्रयतोऽपराह्णे शुचिः शुक्लवासा दर्भहस्तः स्वागत-
मिति ब्रूयात्। पाद्यार्घ्याचमनीयोदकानि दत्वा
ब्राह्मणानुपसंगृह्योपवेशयेदासनमन्वालभ्य।

476 शङ्खः उदकप्लवमुदीच्यां तद्दक्षिणां दक्षिणाप्लवम्।
उत्तरे कृतसंयुक्तान्पूर्वाग्रान्विन्यसेत्कुशान्॥
दक्षिणे दक्षिणाग्रांस्तु सतिलान्विन्यसेत्कुशान्॥

477 शङ्खः नाम चैव तथोत्पत्तिर्न विदुर्ये द्विजातयः।
श्लोकमेते पठेयुस्ते ब्राह्मणानां समीपगाः॥
आगच्छन्तु महाभागा विश्वेदेवा महाबलाः।
ये अत्र विहिताः श्राद्धे सावधाना भवन्तु ते॥

478 शङ्खः त्रीण्येव पात्राणि सतिलकुशगन्धोदकानि।

479 शङ्खलिखितौ अपसव्यं वासो यज्ञोपवीतं कृत्वा तिलैरवकीर्य
यवसुरभितिलोन्मिश्रं पात्रेषूदकं दत्वा शन्नो देवीरिति
[ब्राह्मणाननुज्ञाप्य पितॄनावाहयिष्यामीति उशन्तस्त्वेति
आवाह्य पवित्रान्तरितेषु ब्राह्मणहस्तेषूदकं निनयेत्।

४८० शङ्खः अक्षय्यासनयोः पाद्ये गोत्रं नाम प्रकाशयेत् ।
क्षणे च पिण्डदाने च गन्धधूपादिके तथा ॥

४८१ शङ्खः आवाहनार्घ्यसङ्कल्पे पिण्डदानान्नदानयोः ।
पिण्डाभ्यञ्जनकाले तु तथैवाञ्जनकर्मणि ॥

४८२ शङ्खः उपवीती ततः कुर्याद्विप्रः श्राद्धेऽनुलेपनम् ।
नियुक्तश्च शिखावर्जं माल्यं शिरसि धारयेत् ॥

४८३ शङ्खः उपवीतं करौ कृत्वा कुर्याद्गात्रानुलेपनम् ।
एकवासाश्च योऽश्नीयान्निराशाः पितरो गताः ॥

४८४ शङ्खः सयवं पुष्पमादाय चरणादिशिरोन्तकम् ।
अर्चितेत्यर्चनं कुर्यादन्तरे योदकं तथा ॥

४८५ शङ्खः उग्रगन्धीन्यगन्धीनि चैत्यवृक्षोद्भवानि च ।
पुष्पाणि वर्जनीयानि रक्तवर्णानि यानि च ॥

४८६ शङ्खः शीरबागरुकर्पूरकश्मीरैर्गन्धं प्रशंसति ।
तुलसीभृङ्गराजं च धातुपात्रेऽर्घ्यमेव च ॥
व्यञ्जनादि सुदीप्तं च धूपं देवः प्रशंसति ॥

४८७ शङ्खः जलोद्भवानि देयानि रक्तान्यपि विशेषतः ।
ऊर्णासूत्रं प्रदातव्यं कार्पासमथवा नवम् ॥

488 श्राद्धर्वः जपादिकुसुमं झिण्टीरूपिका सुकुरण्टिका ।
पुष्पाणि वर्जनीयानि श्राद्धकर्माणि नित्यशः ॥

489 श्राद्धर्वः धूपार्थे गुग्गुलं दद्याद्घृतयुक्तं मधूत्करम् ।

490 श्राद्धर्वः घृतेन दीपो दातव्यस्तिलतैलेन वा पुनः ।
वसामेदोद्भवं दीपं प्रयत्नेन विवर्जयेत् ॥

491 श्राद्धर्वः कौशेयं क्षौम कार्पासं दुकूलमहतं तथा ।
श्राद्धेष्वेतानि यो दद्यात्कामानाप्नोति पुष्कलान् ॥

492 श्राद्धर्वः अजस्य दक्षिणे कर्णे पाणौ विप्रस्य दक्षिणे ।
अप्सु चैव कुशस्तम्बे अग्निं कात्यायनोऽब्रवीत् ॥
रजते च सुवर्णे च नित्यं वसति पावकः ।

493 श्राद्धलिखितौ अङ्गुष्ठमुपयम्येदं विष्णुरीति जानु निपद्य भूमौ
पितॄन्ध्यायन्मनसा ।

494 श्राद्धलिखितौ धूपगन्धमाल्यैरलङ्कृत्य ब्राह्मणान्सघृतमन्नं समनु-
ज्ञाप्य दर्भैर्दक्षिणामुखैरग्निं परिस्तीर्य जुहुयात् ।
उ यमायाङ्गिरसे पितृमते स्वाहा । अग्नये कव्यवाह-
नाय स्वाहा । सोमाय पितृमते स्वाहा ।

495 श्राद्धर्वः यथा विभवसारेण वस्त्रं दद्यात्तु पैतृके ।
उत्तरीयमभावे तु शोभनं दर्भनिर्मितम् ॥

496 शङ्खलिखितौ

सन्तानवर्धनं पुत्रं[1] युक्तं च पितृकर्मणि ।
देवब्राह्मणसम्पन्नं[2]अभिनन्दति पूर्वजाः ॥

[भोजननियमाः]

497 शङ्खः दर्भैर्दक्षिणाग्रैरग्निं परिस्तीर्य जुहुयादित्युपक्रम्य
जानू निषद्य भूमौ पितॄन् ध्यायन्मनसा ततस्तिलै-
र्मांसैः शाकै[1]र्यूषैः कृसरपायसापूपैर्लाजै[2]र्मधुना-
घृतेन दध्ना पयसा[3] च प्रभृति मिष्टतोऽन्नं दद्याद-
नसूयुः । ब्राह्मणाश्चा[4]श्नन्तः न गुणदोषानभिदध्युः
नान्योन्यं प्रशंसेयुः । अन्नपानं प्रभूतमिति न ब्रूयुः ।
न[5] विकृतं ब्रूयुः अन्यत्र हस्त[6]संज्ञानात् । यावदूष्मान्नं
तावदश्नन्ति पितरः अन्यत्र मूल[7]फलपानेभ्यः [8]पवित्र-
पाणिर्दर्भेष्वासीनो मधुवा[9]तीयं जपेत् । पवित्रं धर्म-
शास्त्रम् । अप्रति[2]रथं मध्ये गायत्रीमनुश्राव्य ।

498 शङ्खः उच्छिष्टोच्छिष्टसं[+]स्पर्शे स्पृष्ट[1]मात्रं विसृज्य च ।
सर्वान्नं पूर्ववद्[2]दत्त्वा भोजयेत्तु द्वि[3]जोत्तमाः ॥

499 शङ्खः अन्यत्पात्रं निधायात्र सर्वान्नं परिवेषयेत् ।
परिषिच्य ततः पश्चाद्भोजयेत्तु द्विजोत्तमः ॥
उच्छिष्टस्पर्शनं ज्ञात्वा तत्पात्रं परिहृत्य च ।
अस्पृष्ट्वा पाणिना पात्रं भूमिं समनुलिप्य च ॥

500 शङ्खः हुङ्कारेणापि यो ब्रूयाद्धस्ताद्वापि गुणान्वदेत् ।
भूतलाच्चोद्धरेत्पात्रं मुञ्चेद्धस्तेन वा[1]पि तत् ॥
प्रौढपादो बहिः[2]कक्षो बहिर्जानुकरोऽथवा ।
अङ्गुष्ठेन विनाश्नाति मुखशब्देन वा पुनः ॥
पीत्वावशिष्टं तोयादि पुनरुद्धृत्य वा पिबेत् ।
खादितार्धं पुनः खादेन्मोदकानि फलानि वा[3] ॥
मुखेन वा[4] धमेदन्नं निष्ठीवेद्भाजनेऽपि वा ।
इत्थम[5]श्नन्द्विजः श्राद्धं हत्वा गच्छत्यधोगतिम् ॥
पवित्रपाणयः सर्वे ते च मौनव्रतान्विताः ।
उच्छिष्टोच्छिष्टसंसर्गं वर्जयन्तः परस्परम् ॥
न स्पृशेद्वामहस्तेन भुञ्जानोऽन्नं कदाचन ।
न पादौ न शिरो नास्थि न पदा भाजनं स्पृशेत् ॥
आसनेषु समारूढो मन्त्रमुच्चरते द्विजः ।
स चौरः स पापिष्ठो ब्रह्मघ्न स च उच्यते ॥
आसनस्थो यदा विप्रो मन्त्रमुच्चरते यदि ।
त्रयस्ते नरकं यान्ति दाता भोक्ता पिता तथा ॥

501 शङ्खः [1]श्राद्धपङ्क्तौ तु भुञ्जानो ब्राह्मणो ब्राह्मणं स्पृशेत् ।
[2]तदन्नमत्यजन्भुक्त्वा गायत्र्यष्टशतं जपेत् ॥
उच्छिष्टलेपनस्पर्शे प्रक्षाल्यान्येन वारिणा ।
भोजनान्ते नरः स्नात्वा गायत्रीं त्रिशतं जपेत् ॥

502 शङ्खः भुञ्जानस्य तु विप्रस्य सिक्थोच्छिष्टं तु यः स्पृशेत् ।
प्रक्षाल्य भुक्त्वा स्नात्वा च गायत्रीं द्विशतं जपेत् ॥
उच्छिष्टभोजने चैव सहस्रं समुपोषणम् ॥

503 शङ्खलिखितौ गायत्रीमनुश्राव्य तृप्तान्ज्ञात्वा स्वदितमिति पृष्ट्वा
शेषमन्नमनुज्ञाप्य प्रकृतादन्नविकिरं कुर्यात् । स्वधां
वाचयित्वावशिष्टशास्त्रीन् निदध्यात् । त्रिण्येवोदपा-
त्राणि सतिलानि सपवित्राणि मृन्मयाश्ममयौदुम्बराणि
वा धूमगन्धमाल्यादर्शदीपाञ्जनादीनि चोपहरेत् ।
सर्वान्नप्रकारमादाय पिण्डान्निदध्यात् । अपसव्येन
पाणिना दक्षिणं पाणिमुपधायैकैकं त्रिभिरभिमन्त्र्या-
सावेतत्त इति । दर्भेषु तेष्वेव पाणिं प्रमृज्योदपात्रैः
परिश्राव्य ब्रूयाद्दातारः सन्त्विति बहुदेयं नोऽस्त्विति ॥

[श्राद्धे विहितानि]

504 शङ्खः श्राद्धं कृत्वा प्रयत्नेन त्वराक्रोधविवर्जितः ।
उष्णमन्नं द्विजातिभ्यः श्रद्धया विनिवेदयेत् ॥
अन्यत्र फलमूलेभ्यः पानकेभ्यश्च पण्डितः ।
भोजयेद्विधिवत्पश्चाद्गन्धमाल्योज्ज्वलान्द्विजान् ॥

505 शङ्खः उत्पवनं पूर्वभागस्थितस्य कस्यचिदंशस्यापनयनम् ।
अधिकपरिमाणवतां प्लावनं द्रवाणां त्यागः ॥

506 श्राद्ध: सैन्धवं लवणं यच्च तथा मानससंभवम् ।
पवित्रे परमे ह्येते प्रत्यक्षमपि नित्यशः ॥

507 श्राद्ध: आम्रान्पालेवतानिक्षून्मृद्विकाभव्यदाडीमान् ।
विदार्यांश्च भरुडांश्च श्राद्धकालेऽपि दापयेत् ॥

508 श्राद्ध: द्राक्षां मधुयुतां दद्यात्सक्तूञ्शर्करया सह ।
दद्याच्छ्राद्धे प्रयत्नेन शृङ्गाटककशेरुकान् ॥

509 श्राद्ध: आम्रांश्च कदलीभेदान्मृद्वीकां चन्यदाडिमे ।
बदर्यांश्च सुरण्डांश्च श्राद्धकालेऽपि दापयेत् ॥

510 श्राद्ध: राजीवाः सिंहतुण्डाश्च सशल्काश्च तथैव च ।
पाठीनरोहितौ चापि भक्ष्या मत्स्येषु कीर्तिताः ॥

[श्राद्धभोजने निषिद्धानि]

511 श्राद्ध: नाद्याच्छ्राद्धनिषिद्धं तु भक्ष्यभोज्यादिकं द्विजः ॥
512 श्राद्ध: पिप्पली मरिचं हिङ्गुं वंशाग्रं च विवर्जयेत् ॥

513 श्राद्ध: भूस्तृणं सुरसं शिग्रुं पालङ्क्यां[2] सूमूकं तथा ।
कुष्माण्डालाबु[3]वार्ताककोविदारांश्च वर्जयेत् ॥

514 श्राद्ध: पिण्डालकं च तुण्डीरं करमर्दं च नालिकेरकम् ।
कुष्माण्डं बहुबीजानि श्राद्धे दत्वा व्रजत्यधः ॥

515 शाङ्ख्यः वर्जयेद्गृञ्जनं श्राद्धे काञ्जिकां पिण्डमूलकम् ।
कलम्बां यानि चान्यानि हीनानि रसगन्धतः ॥
श्राद्धकर्मणि वर्ज्यानि कारणं चात्र वक्ष्यते ।
पुरा देवासुरे युद्धे निर्जितस्य बलेः सुरैः ॥
ब्राह्मणेभ्यो विस्फुरन्तः पतितास्तोयबिन्दवः ।
तत एतानि जातानि वर्ज्यानि श्राद्धकर्मणि ॥
पिप्पली मरिचं चैव पटोलं बृहतीफलम् ।
वंशं करीरं सुरसं गर्जकं भूतृणानि च ॥
अवेदोक्ताश्च निर्यासा लवणान्यूषराणि च ।
श्राद्धकर्मणि वर्ज्याणि याश्च नार्यो रजस्वलाः ॥

516 शाङ्ख्यः कृष्णाजाजी विटं चैव शीतपाकी तथैव च ।
वर्जयेल्लवणं सर्वं तथा जम्बूफलानि च ॥
अवक्षुतावरुदितं तथा श्राद्धेषु वर्जयेत् ॥

517 शाङ्ख्यः बिडालोच्छिष्टमाघ्रातं श्राद्धे यत्नेन वर्जयेत् ।
कुष्माण्डं महिषीक्षीरमाढक्यो राजसर्षपाः ॥
चणका राजमाषाश्च घ्नन्ति श्राद्धं न संशयः ॥

518 शाङ्ख्यः पिप्पली मरिचं चैव तथा वै पिण्डमूलकम् ।
कृतं च लवणं सर्वं वंशाग्रं च विवर्जयेत् ॥

519 शाङ्ख्यः राजमाषान्मसूरांश्च कोद्रवान्कोरदूषकान् ।
लोहितान्वृक्षनिर्यासाञ्छ्राद्धकर्मणि वर्जयेत् ॥

520 शङ्खः   श्राद्धे नियुक्तान्भुञ्जानान्न पृच्छेल्लवणादिषु ।
उच्छिष्टाः पितरो यान्ति पृच्छतो नात्र संशयः ॥

521 शङ्खः   दातुः पतति बाहुर्वै जिह्वा भोक्तुस्तु भिद्यते ।

522 शङ्खलिखितौ   तत्रापेयान्यभक्ष्याणि च वर्जयेदमेध्यपतितचण्डाल-
पुल्कसरजस्वलाकुणपकुष्ठिस्पृष्टानि ।

523 शङ्खः   भीतार्त[1]गीतरुदिताक्रन्दिता[2]वघुष्ट[3]क्षुधितपरिशुष्क-
विस्मितोन्मत्तावधूतराजपुरोहिता[4]ज्ञानि वर्जयेत्

524 शङ्खः   न तदश्नीयाद्यदन्नं देवपितृमनुष्यार्थं न कुर्यात् ।

[पिण्डदानक्रिया]

525 शङ्खः   उच्छिष्टसन्निधौ कार्यं पिण्डनिर्वपणं बुधैः ।
आदौ वापि तथा कुर्यादग्निकार्यं यथाविधि ॥

526 शङ्खः   सकृत्त्रिर्वा विकिरं कुर्यात् ।

527 शङ्खलिखितौ   सव्येन पाणिना दक्षिणं पाणिमुपसमाधाय एकैकं
त्रिभिरामन्त्र्य असावेतत्ते ।

528 शङ्खपारस्करौ   यथावनिक्तं पिण्डान्दद्यादसावेतत्ते ।

529 शङ्खः   गन्धमाल्यधूपाच्छादनसिद्धोपहारैः पिण्डं निर्वपेत् ।

530 शङ्खः : ऊर्णासूत्रं प्रदातव्यं[1] कार्पासमथवा नवम् ।
दशां विवर्जयेत्प्राज्ञो यद्यप्यहतवस्त्रजा[2] ॥

[पिण्डनैवेद्यः]

531 शङ्खः : यत्किञ्चित्पच्यते गेहे भक्ष्यं भोज्यमथापि[1] वा ।
अनिवेद्य न भोक्तव्यं[2] पिण्डमूले कथञ्चन ॥

[ब्राह्मणविसर्जनम्]

532 शङ्खलिखितौ एवं वरान्याचयित्वा नमस्कृत्य पिण्डानप्सु[1]
विन्यसेदग्नौ वा निक्षिपेत् ।

533 शङ्खलिखितौ पत्नी वा मध्यमं[1] पिण्डमश्नीयादार्तवस्नाता[2] ।

534 शङ्खः भोजयित्वा यथा भक्त्या आचान्तान्दत्तदक्षिणान् ।
स्वस्तिवाच्य प्रसन्नात्मा अनुव्रज्य विसर्जयेत् ॥

535 शङ्खलिखितौ बलिं बलिभुजो यत्र प्रदत्तं नैव भुञ्जते ।
नैव तृप्ताः प्रयास्यन्ति पितरस्तस्य सानुगाः ॥

[सपिण्डीकरणम्]

536 शङ्खपैठीनसी अपुत्रा ये मृता केचित्पुरुषा वा स्त्रियोऽपि वा ।
तेषां वस्त्रादिभिः सार्धं सपिण्डीकरणं ध्रुवम् ॥

537 शङ्खः मातुः सपिण्डीकरणं कथं कार्यं भवेत्सुतैः ॥
पितामह्यादिभिः सार्धं सपिण्डीकरणं स्मृतम् ॥

538 शङ्खः पुत्राणामसवर्णाजाप्र(ज)तानां च योषिताम् ।
सपिण्डता विनिर्दिष्टा पितृपक्षे त्रिपूरुषी ॥

539 शङ्खः सपिण्डीकरणादूर्ध्वं यत्र यत्र प्रदीयते ।
तत्र तत्र त्रयं कुर्याद्वर्जयित्वा मृताहनि ॥

540 शङ्खः पूर्वेद्युर्वार्षिकं श्राद्धं परेद्युः प्रथमाब्दिकम् ।

541 शङ्खः अन्वारोहे तु भर्त्रैव मातुः सह सपिण्डनम् ।

542 शङ्खः चतुर्दश्यां तु यत्पूर्वं सपिण्डीकरणं स्मृतम् ।
एकोद्दिष्टविधानेन तत्कार्यं शस्त्रघातिनः ॥

543 शङ्खः सपिण्डीकरणादूर्ध्वंमृते कृष्णाचतुर्दशीम् ।
प्रतिसंवत्सरादन्यदेकोद्दिष्टं न कारयेत् ॥

544 शङ्खः कृतेषु मासिकेष्वेषु सपिण्डीकरणं विना ।
संवत्सरे व्यतीते तु पुनस्तानि समाचरेत् ॥

545 शङ्खः त्रैवार्षिकं च प्रेतं स्याच्छङ्खस्य वचनं यथा ।

[श्राद्धफलम्]

546 शङ्खः प्रजामिष्टां यशः स्वर्गमारोग्यं च धनं तथा।
नृणां श्राद्धे सदा प्रीताः प्रयच्छन्ति पितामहाः॥

[श्राद्धे नियमाः]

547 शङ्खलिखितौ
मैथुनं ऋतुकालीनमपि तथा च श्राद्धानन्तरं ऋतुस्नातां तदहोरात्रं परिहरेत्।

548 शङ्खः निमन्त्रितस्तु यः श्राद्धे मैथुनं सेवते द्विजः।
श्राद्धं दत्वा च भुक्त्वा च युक्तः स्यान्महतैनसा॥

549 शङ्खः रात्रौ श्राद्धं न कुर्वीत राक्षसी सा प्रकीर्तिता।
सन्ध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते॥

550 शङ्खः क्षत्रियैर्मृगमायान्तु विधिना यदुपाहृतम्।
श्राद्धकाले प्रशंसन्ति सिंहव्याघ्रहतं च यत्॥

551 शङ्खः न कुर्यादधिके मासे कर्माकर्म कथञ्चन।
मुक्त्वा नैमित्तिकं कर्म तद्धि तत्रैव कीर्तितम्॥

552 शङ्खः शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः।
नवमी दशमी चैव नोपोष्या परसंयुता॥

553 शाद्धु: सावकाशं तु यत्कार्यं न कुर्यान्मासि दूषिते।
कुर्याद्विरवकाशं तु नित्यं नैमित्तिकं तथा॥

554 शाद्धु: सद्यः शौचेऽपि दातव्यं प्रेतस्यैकादशेऽहनि।
स एव दिवसस्तस्य श्राद्धशय्यासनादिषु॥

555 शाद्धु: आदौ मध्ये तथान्ते च उदकादि समापयेत्।
स एव दशमे कुर्यात्पाषाणोत्थापनं स्मृतम्॥
प्रथमेऽहन्यनारभ्य कर्ता सहतिलोदकम्।
यदि पश्चाच्च कर्तारस्तेऽन्तर्दशे तु सङ्क्रमे॥
कुर्युर्जान्तरगते दर्शे सङ्क्रमे दशमेऽहनि॥

व्यवहाराध्यायः

राजधर्मप्रकरणम्

[राज्ञः आवश्यकता]

556 शङ्खलिखितौ

वर्णाश्रमाणां संस्थानमानुपूर्व्यानुपूर्वशः ।
तेषां हेतुरवस्थाने राजा सुप्रस्थितो यदि ॥
राजमूलमिदं राष्ट्रं ब्रह्मक्षत्रपुरोगमम् ।
स्थिते राजनि तद्धर्मे दुराचारान्न कुर्वते ॥

[राज्ञो गुणाः]

557 शङ्खलिखितौ

राजा दीर्घदर्शी महोत्साहः शक्तिमाननसूयुर्भक्त-
वत्सलः । त्यागी शरण्यः सर्वभूतानां संविभक्तः
सत्यवागमत्सरी गम्भीरोऽमर्षणो बुधस्तेजस्वी
प्रतिविधानकुशलोऽदीर्घसूत्रो दक्षः क्षमावाल्लब्धशो
देशकालद्रव्यप्रयोगसङ्ग्रहनिमित्तज्ञानकुशलो
गूढमन्त्रप्रचारः संवृत्तरन्ध्रः पररन्ध्रज्ञो दृढप्रहारी
लघुहस्तो जितस्थानासनहिमातपो जितरागद्वेष-
लोभमत्सरः प्रजाभिरामो दीनानुग्राहकर्ता ब्राह्मणे-
भ्यश्चदाता श्रीयशोर्थी ।

[राजधर्मः]

558 शङ्खः स मूर्धाभिषिक्तो राजा भवति ।

559 शङ्खलिखितौ [आफलोदयं मन्त्रगुप्तिः]

560 शङ्खलिखितौ दद्याद्दानमर्चयित्वा ब्राह्मणाय निमित्तपूर्वं शेषेभ्यः ।
कृपणातुरानाथव्यङ्गविधवाबालवृद्धानौषधावसथा-
शनाच्छादनैर्बिभृयात् ।

561 शङ्खः न व्रतैर्नोपवासेन न च यज्ञैः पृथग्विधैः ।
राजा स्वर्गमवाप्नोति प्राप्नोति परिपालनात् ॥

562 शङ्खलिखितौ राजन्यवैश्यावप्यजीवन्तौ राजानमुपतिष्ठेयाताम् ।
तावुभौ शक्तितः संविभक्तावुपकुर्यातां स्वधर्मा-
नुष्ठानेन शिल्पिनः कारवश्च शूद्राः ।

563 शङ्खलिखितौ आगमं निर्गमं स्थानं तथा वृद्धिक्षयावुभौ ।
विचार्य सर्वशस्यानां कारयेत्क्रयविक्रयौ ॥

564 शङ्खलिखितौ स्वपक्षे परपक्षे वा स्थानवृद्धिक्षयाश्रमः ।
स्थानादीनां विभागश्च काले द्रव्यार्थसङ्ग्रहः ॥

565 शाङ्खलिखितौ राज्ञः शङ्खपटहतूर्येण प्रस्वापोत्थानम् ।

566 शाङ्खलिखितौ राज्ञः प्रत्यहं घृतान्वीक्षणं मङ्गलदर्शनं कपिला-
प्रदानं स्वलङ्कृतस्य सम्भाषणं वैद्यदर्शनं सप्रहासं
सविकल्पं विनयपूर्वं वृद्धेषु ।

567 शाङ्खलिखितौ वाहनयोधानां सततमन्वीक्षणम् । प्रतिमासं द्विसौ-
वर्णिकी वृत्तिः । षाण्मास्यं स्मरणं चातुर्मास्यं वा ।
स्वर्यातेषु दानमनुक्रोशः विदितेष्वनुप्रदानं कुल-
चारित्रशीलविद्यालक्षणगुणाधिकेषु संमानं प्रयुञ्जीत ।

568 शाङ्खलिखितौ राजक्रतुरेवाऽश्वमेधस्तं नासार्वभौमः प्रतिपादयितु-
मर्हति । अश्वमेधेन यक्ष्य इति परविषयमभिया-
याद्देशकालशक्तिसम्पन्नः प्रभूतयवसेन्धनोदका-
विच्छिन्नसाम्परायिकः ।
पथिसंविहितसर्वोपकरणो दुर्गासारामात्यदेश-
दण्डाक्रन्दाद्यगुणविधिज्ञः पर्षदं प्रति नयवान्
विन्दितमध्वानं हितमनुक्रामेत् यथा भूमिभागस्तथा
विनियोगः श्रेयान् पानभोजनोपनिवेशः स्थान-
शङ्काप्रतिविधानकुशलो भूपतिरवहितः शत्रुणा सह
युध्येत ।

569 शङ्खः न पानीयं पिबन्तं न भुञ्जानं नोपानहौ मुञ्चन्तं
[1]जावमार्णं सधर्मा न[2] स्त्रियं न करेणुं न वाजिनं
न सारथिं न दूतं न ब्राह्मणं न राजानमराजा
हन्यात् ।

570 शङ्खलिखितौ न वैष्टिकं जाङ्घिकं क्षेत्रद्रव्यापहरणे पुष्पमूल-
प्रचयनं स्वयमर्जितप्रवेशनं निष्क्रमण प्रवेशने-
ष्वनिवेदनं स्कन्धबाह्येषु शुल्कोगणसमयश्रेणि-
पूगचरणव्यवहारनिष्ठास्वामिनः परिज्ञातारोऽन्यत्र
राजाभिद्रोहात् नगरनिवासिनां विप्रेतराणामपि
परिगृह्य अनपराधाः ।

571 शङ्खलिखितौ न गृध्रुपरिवारः स्यात्कामं गृध्रु राजा श्रेयान्न
[1]हंसपरिवारो न हंसो गृध्रुपरिवारः । परिवाराद्धि
दोषाः प्रादुर्भवन्ति । तेऽलं विनाशाय तस्मात्पूर्व-
मेव तत्परिवारं[2] लिखेत् [3]श्रुतशीलान्वयोपपन्नम् ।

572 शङ्खलिखितौ सर्वेषां राजकुलरक्षणं कोशपरिपालनं गोब्राह्मणपरि-
त्राणं साम्परायिकं क्रियासाधारणत्वादनुजीविनां
विशेषेण चारप्रतिचारौ मन्त्रपरिधयश्च सर्पाः तत्प्रयोजन-
त्वात्प्रत्यक्षावृत्तिस्तस्य राज्ञो भवेदकालो हि दोषस्तस्माद्

भृत्यपक्षाः क्रोधलोभमानभयदोषोपहताः संलपिता विमानिताभ्याख्याता दानमानस्थानव्यवरोपिता हृतसर्वस्वाः स्वदोषोपहतादयः सततं प्रत्यवेक्षितव्या धर्मार्थहितेष्वेतेषां यतेत स्वविषयाभावः परविषयभेदः सामादिभिरुपायैर्मन्त्रशेषु मन्त्रकर्म दण्डकर्म कर्मकरेषु वीरा महत्स्वात्मनि च धर्मनित्याः सङ्ख्येष्वलुब्धाः प्रत्यन्तेषु मौलाः शुचयोऽर्थकृत्येषु अन्येषु यथानुरूपं नियोज्याः।

573 शङ्खलिखितौ विश्वासिनश्चारान्समानयेत्तानन्यत्र प्रेषयेत् ।

574 शङ्खलिखितौ राजा स्वस्वाधीनवृत्तिरात्मप्रत्ययकोशः ‡ स्वयं कृत्यानुदर्शी विप्रस्वनिवृत्तश्चिरं भद्राणि पश्यति ।

575 शङ्खः धर्मस्थानं प्राच्यां दिशि तच्चाम्युदकैः समवेतं स्यात् ।

576 शङ्खः पैत्रं विनाऽप्यागमेन पूर्वपुरुषाभ्यां भुक्तं लभेत् ।

[राज्ञोऽदण्ड्याः]

577 शङ्खलिखितौ अदण्ड्यौ मातापितरौ स्नातकपुरोहितौ परिव्राजकवानप्रस्थौ जन्मकर्मश्रुत[1]शीलशौचाचारवन्तश्च[2] [3]ते हि धर्मप्रतिकरा [4]राज्ञः स्त्रीबालवृद्धास्तपस्विनः। तेभ्यः क्रोधं नियच्छेत् ।

578 शङ्खलिखितौ
सर्वत्र त्रयाणां वर्णानां धनहारकारवधबन्धाः
क्रियासु चोपरोधो महत्स्वपि पातकेषु विवासो-
ऽङ्ककरणं ब्राह्मणस्य प्रायश्चित्तानि शोधनमपीड्यो
हि ब्राह्मणः ।

[राज्ञो दण्डयाः]

579 शङ्खः दण्डो यथा सारापकारं च वयोविद्यावर्णलक्षणगुणानुगः।

580 शङ्खलिखितौ
येन येनाङ्गेनापराधं कुर्यात्तत्तस्य छेत्तव्यम् ।
अष्टसहस्रं वा दण्डयः । अन्यत्र ब्राह्मणात् ।

581 शङ्खलिखितौ
शिल्पिनः कारवः शूद्रास्तेषां व्यभिचारेऽपि शिल्पोप-
करणानि रक्षेत् । तुलामानप्रतिमानसमुत्थानि वणि-
क्पधानम् । क्षेत्रबीजभक्तगोशाकटकर्षणद्रव्याणि कर्ष-
काणाम् । वाद्यभाण्डालङ्कारवासांसि रङ्गोपजीविनाम् ।
गृहशयनालङ्कारवासांसि वेश्यानाम् । शस्त्राणि शस्त्रो-
पजीविनाम् । सर्वेषां करणद्रव्याणि नाऽहार्याणि राज्ञा
धार्मिकेण । अस्वा हि पुरुषाः पापबहुलाश्चाविधेयाश्च
भवन्ति । तेभ्यः पापांशभागजा । तस्माद्धनाद्धनानुप-
करणान्कुर्यात् । तन्मूला हि वृत्तिः । वृत्तिमूलो निवासः।
तैर्निवसद्भिः स्फीतं राष्ट्रमित्युच्यते ।

582 शङ्खलिखितौ
चतुर्विंशतिरेकनवतिः प्रथम[1] साहसः । द्विशतः[2]
पञ्चशतश्चेति मध्यमः । षट्शतः[3] साहस्रश्चेति[4]
उत्तमः । यथा सारापकारं सर्वेषामानुपूर्व्येण ।

[दण्डप्रमाणम्]

583 शङ्खः काकिन्यादिस्त्वर्थदण्डः सर्वस्वान्तस्तथैव च ।

[प्रमाणबलाबलविचारः]

584 शङ्खलिखितौ
सामन्तविरोधे लेख्यप्रत्ययौ[1] लेख्यविरोधे ग्रामनगर-
वृद्धश्रेणीप्रत्ययौ[2] ग्रामनगर[3]श्रेणीविरोधे दशवर्षा[4]
भुक्तिरन्यत्र राजविप्लवात् ।

साक्षिप्रकरणम्

[कूटसाक्षिणः]

585 शङ्खलिखितौ मन्त्रिभिः शास्त्रसामर्थ्याद्दुष्टलक्षणं ग्राह्यम् । तिर्यक्प्रेक्षते, समन्तादवलोकयति, अकस्मान्मूत्रपुरीषं विसृजति, देशाद्देशं गच्छति, पाणिना पाणिं पीडयति, नखान्निकृन्तति, मुखमस्य विवर्णतामेति, प्रस्विद्यति चास्य ललाटं, चक्षुर्वाचं न प्रतिपूजयति, अकस्माद्द्रवति, प्रशंसति पुनः पुनः अन्यमपनुदति बहिर्निरीक्षते श्वासं परामृशति [शोकमुपवर्णयति] भूमिं विलिखति शिरः प्रकम्पयति ओष्ठौ निर्भुजति सृक्किणी परिलेढि अविस्मितः कर्मसु महत्सु भ्रुवौ संहरति हसति तूष्णीं ध्यायति पूर्वापरविरुद्धं व्याहरति एवमादि दुष्टलक्षणम् । क्रुद्धस्य च स्वामिनोऽन्यत्र प्रकृतिशीलात् । तत्र राजमूला व्यवहाराः ।

[साक्षिणः]

584 शङ्खलिखितौ श्रोत्रियो गुणवान् रूपवान् माणवकः शीलवान् क्षत्रियस्तथा वैश्यः शूद्रो वा धर्मवांश्च यः शीलोपपन्नः कर्मवादैर्विदितो नत्वेकः ।

587 शङ्खलिखितौ
मौला: प्रतिष्ठिता: साक्ष्यर्थं विदितवन्त: कुलीना
[1]ऋत्विजो जन्मत: कर्मतोऽर्थत: शुद्धा: पुत्रिण:
सत्यवादिन: श्रौतस्मार्तक्रियायुक्ता: विगतद्वेषमत्सरा:
अप्रवासिनो युवानो लोभमोहविवर्जितास्त्र्यवरा
नवसंख्याका न जातु कूटतां प्रतिपद्यन्ते कामं
त्रयाणामेकोऽपि स्वपरिगृहीत: सर्वलोकसंमत:।

[असाक्षिण:]

588 शङ्ख: पित्रा विवदमानो। गुरुकुलवासी [1]परिव्राजकवान-
प्रस्था [2]निर्ग्रन्थाश्चासाक्षिण:।

589 शङ्खलिखितौ एक: साक्षी सर्वथा न ग्राह्य:।

590 शङ्खलिखितौ शुल्कगुल्माधिकृतौ दूतौ वेष्टितशिरा: [1]स्त्रियश्च
सर्वा: गुरुकुलवासिन: परिव्राजक[2]वानप्रस्थ[3]निर्ग्रन्थ-
शङ्खव्यालग्राहिण:।

591 शङ्खलिखितौ पितापुत्रयोर्विरोधे साक्षी न तिष्ठेत्।
यस्तिष्ठेत्स दण्ड्यस्त्रीन्कार्षापणान्यश्चान्तरे तिष्ठेत्
सोऽप्यष्टशतं दाप्य:।

[साक्षिद्वैधे निर्णयः]

५१२ शङ्खलिखितौ

यदा तु साक्षिप्रश्नाज्जयपराजयावधारणे वृत्ते पराजितो वादी पूर्वेभ्योऽधिकगुणैः समसङ्ख्यैरेव समगुणैः पूर्वद्विगुणसङ्ख्यैरन्यथा ज्ञापयति तदा पूर्वनिर्णये त्वनिर्णयो भवति पूर्वसाक्षिणां कूटत्वावधारणात् ।

~~593 शङ्खलिखितौ~~

दिव्यप्रकरणम्

[दिव्यप्रकाराः]

593 शङ्खलिखितौ असाक्षिप्रणिहिते दिव्यम् । अथवा मित्रैः सज्जनै-राजानं वा शोधयेदेव । स चेद्दण्ड्योऽर्थिनां चार्थं दापयेत् ।

594 शङ्खलिखितौ असाक्षिप्रणिहिते पुरुषप्रत्ययः शासनं भेदनं ताडनम् । संन्यासे वा विवादे वा दैवं वा कोषविषभक्षणशास्त्र-जलम् ।

595 शङ्खः तत्र दिव्यं नाम [1]तुलाधारणं विषाशनमप्सु[2] प्रवेशो लोहधारणमिष्टापूर्त[3]प्रदानमन्यांश्च शपथान् कारयेत् ।

[उदकदिव्यम्]

596 शङ्खलिखितौ नाभिप्रमाणोदकस्थो याज्ञियवृक्षोद्भवां धर्मस्थूणामवष्टभ्य प्राङ्मुखस्तिष्ठेत् ।

597 शङ्खलिखितौ सदसच्च त्वमेव वरुण उभयोः प्रतिष्ठितः[1] ।
त्वयि सत्यं त्विदं[2] देव वरुण त्वमेव तद्ब्रूहि
[3]वरेण्य [4]तैयादिशास्व ।

[लोहधारणदिव्यम्]

598 शङ्खलिखितौ अथ वा[1] सप्ताश्वत्थपर्णान्तरितं[2] षोडशपलमग्निवर्णं[3] लोहपिण्डमञ्जलिनादाय सप्तमर्यादां गच्छेत्।

[शपथविधिः]

599 शङ्खलिखितौ साक्षिणः सुवर्णरजत[1]रत्नगोधान्यसूर्याग्निगजस्कन्धाश्व पृष्ठरथोपस्थशस्त्रा[2]दिभिस्तथा पुत्रपौत्रैः[3]। यथावर्णं परिग्रहविशेषतः[4] स्यात् देवब्राह्मणस्वामिनामग्रतः।

600 शङ्खः प्राड्विवाको नृपो वापि[1] समवेतान् पृथक्पृथक्।

[संभूयसमुत्थानप्रकरणम्]

601 शङ्खः तत्र[1] चेदनुप्राप्ते[2] सवने ऋत्विङ् म्रियेत तस्य सगोत्रोऽथ[3] शिष्यो वा[4] तत्कार्यमनुपूरयेत् अथ चेदबान्धवस्ततोऽन्यमृत्विजं वृणुयात्।

602 शङ्खलिखितौ अथ ऋत्विजि वृत्ते पश्चादन्यं वृणुयात्। पूर्वाहूतस्यैव दक्षिणा। पश्चादाहूतः किञ्चिल्लभेत। प्रवसेच्चेत् कालं निमित्तं चा (वा)पेक्ष्य यक्ष्यमाणस्तत्कालमुदीक्षेत्।

नान्तरा यजेत । स्याद्वात्ययिको वा । तं क्रतुं समापयेत ।
प्रोष्य प्रत्यागतश्च किञ्चिल्लभेत । अथ चेत्प्रतिषिद्धः
प्रवसेत्कामादनुप्राप्ते सवने ऋत्विक्छतं दण्ड्यः ।
स एव चादुष्टस्तस्य ऋत्विक्कुलोपाध्यायः । एवं व्याधित-
पतितोन्मत्तप्रहीणप्रध्वस्तेषु संप्रसादकरण मृत्विक्षु ।
कामाच्चेदपतितं याज्यं त्यजेदृत्विक् प्राप्नुयाद् द्विशतं
दण्डम् । याज्यश्चैवं तदेवाप्नुयात्त्यागी ऋत्विजोऽपतितस्य ।
कामं पतिमश्रोत्रियं त्यजेद्याज्यं चाभिशस्तमदातारम् ।

603 ब्राह्वृ: अन्तेवासी ऋत्विग्वा ।

|3|

स्वामिपालविवादप्रकरणम्

[गवादिभिः परसस्यादिभक्षणे दण्डः]

604 शङ्खलिखितौ रात्रौ [1]चरन्ती गौः पञ्चमाषान् [2]दिवा त्रीन्मुहूर्ते [3]माषं भासे [4]त्वदण्डः ।

605 शङ्खलिखितौ सर्वेषामेव वत्सानां माषं, महिषी दश, [2]खरोष्ट्रं षोडश, अजाविकं चतुरः ।

[अदण्ड्याः पशवः]

606 शङ्खः छागवृषभा अनिर्दशाहा गावः सस्यापराधे न दण्डमाप्नुयुः ।

607 शङ्खलिखितौ क्षुद्रपशवः सर्वथानिवार्याः । [1]अश्वतरगजवाजिन-श्चादण्ड्याः । अवध्याः शनैरपवार्याः ।

[वृत्तिकरणप्रकाराः]

608 शङ्खलिखितौ मार्गक्षेत्रे वृत्तिः कार्या यामृष्टो नावलोकयेत् । नाश्वशूकरावन्तारं विन्देत्ताम् ।

सीमाविवादप्रकरणम्

[सीमाभेदे दण्डः]

609 शङ्खलिखितौ क्षेत्रमर्यादाभेदेऽष्टशतम् ।

610 शङ्खलिखितौ सीमातिक्रमणेऽष्टसहस्रम् । क्षेत्रोदकाहरणेऽष्ट-
शतम् ।

611 शङ्खः सीमाभेत्तारमुत्तमसाहसं दण्डयित्वा पुनः
सीमां कारयेत् ।

[क्षेत्रादिषु विसर्गमर्यादा]

612 शङ्खलिखितौ मार्गक्षेत्रे पथि विसर्गो राजमार्गे रथपरिवर्तनं
पूर्वमर्यादास्थापनं तोरणगृहरथ्यान्तरेषु त्रिपदं
देवराजायतनेषु यथेष्टम् ।

स्वामिविक्रयप्रकरणम्

[अस्वामिविक्रयः]

613 बृह॰ अनात्मीयस्य विक्रेता गृहक्षेत्रादिकस्य तु ।
क्षेत्रे तत्सदृशं दद्यात् मूल्यं वा क्रतुरिच्छया ॥

[दत्ताप्रदानिकप्रकरणम्]

614 शङ्खलिखितौ
गृह्णात्यदत्तं यो मोहाद्यश्चादेयं प्रयच्छति ।
दण्डनीयावुभावेतौ धर्मज्ञेन महीभुजा ॥

वाक्पारुष्यप्रकरणम्

615 शङ्खलिखितौ

यथाकालमुत्तमवर्णाक्षेपे तत्प्रसादो दण्डस्त्रयो वा कार्षापणाः। शुक्तवाक्याभिधानेऽप्येवमेव[1]। तथा [2]सवर्णव्यतिक्रमे द्वादश कार्षापणाः। यथारूपविशिष्टाक्षेपे विशिष्टस्य चतुर्विंशतिः। [3]अवशिष्टातिक्रमे विशिष्टस्य ततोऽर्धम्।

616 शङ्खलिखितौ

तथाधिकृतान्[1]विप्रान्मुक्त्वा [2]निर्भर्त्स्य [3]मुण्डनं ताडनं [4]गोमयालेपनं खरारोहणं [5]दर्पहरो दण्डो वा।

617 शङ्खलिखितौ

आक्रोशे ब्राह्मणस्य [1]क्षत्रियः [2]शतं [3]दण्ड्यः। शतार्धं वैश्यस्य पञ्चविंशतिः शूद्रस्य॥

[दण्डपारुष्यप्रकरणम्]

618 शङ्खलिखितौ

प्रहारोद्यमे षट्पञ्चाशत्। निपातने तद्द्विगुणम्।

स्तेयप्रकरणम्

[कूटशासनप्रयोगेषु दण्डाः]

619 शङ्खलिखितौ कूटशासनप्रयोगे राजशासनप्रतिषेधे कूटतुला-
मानप्रतिमानव्यवहारे शारीरोऽङ्गच्छेदो वा।

[स्तेनस्य राज्ञि किल्बिषप्रमार्जनम्]

620 शङ्खलिखितौ अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्यापचारिणी।
गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम्॥

[सुवर्णरत्नापहरणादिषु दण्डः]

621 शङ्खलिखितौ प्रतिषिद्धभाण्डनिर्हारे सुवर्णरत्नापहरणे वापीतडागो-
दपानभेदमार्गरसद्रव्यदूषणेऽदासीदाससम्प्रदानकरणे
शारीरोऽङ्गच्छेदो वा।

622 शङ्खलिखितौ स्कन्धवाह्येष्वशुल्को नगरवासिनां विप्रेतराणामपि।

623 शङ्खलिखितौ तुलामानप्रतीमानव्यवहारार्घसंस्थापनं देशद्रव्यानुरूपं
प्रत्ययितपुरुषाधिष्ठितम्।

624 शङ्खः शारीरस्त्ववरोधादिजीवितान्तस्तथैव च।

[राजपुत्रापहारादिषु दण्डः]

625 शङ्खलिखितौ राजपुत्रापहारे[1]ऽष्टसहस्रं शारीरो वा दण्डस्तत्कुलीनेषु पुत्रेष्व[2]र्धं स्त्रीपुंसयोश्च ।

[हस्त्यश्वादिहरणे दण्डः]

626 शङ्खलिखितौ हस्त्यश्वरथ[1]गोवृषयानेषु राजपुत्रापहारवद्दण्डः । अजाविकेष्वर्धत्रयोदशपणा नकुलबिडालापहरणे त्रयः [2]कार्षापणाः ।

627 शङ्खलिखितौ अष्टशतं सीताद्रव्यापहरणे यथाकालम् ।

628 शङ्खलिखितौ कृतकाष्ठाश्मकौलालचर्मवेत्रदलभाण्डेषु मूल्यात् पञ्चगुणः त्रयो वा कार्षापणाः । एकचक्रापहरणे चत्वारिंशत् शकटे त्वशीतिशतम् ।

[अब्राह्मणेन ब्राह्मणस्य समिधादिहरणे दण्डः]

629 शङ्खलिखितौ अब्राह्मणो ब्राह्मणस्य समिदाज्येध्माग्निकाष्ठतृणपल्लवपुष्पफलमूलान्यपहरत्त्वबलादविज्ञातो वा हस्तच्छेदनमाप्नुयात् । कुशाकरकाग्निहोत्रद्रव्यापहारे प्रत्यक्षतोऽङ्गच्छेदः स्यात् अप्रत्यक्षं यथा विदितोऽयं किल्बिषीति ब्राह्मणः खरयानमवाप्नुयात् । मूत्रमौण्ड्यमितरेषां खरयानमेव ।

[पथिकानां न दोषः]

630 शङ्खलिखितौ तिलमुद्गमा[1]षयवगोधूमादीनां[2] सस्यमुष्टिग्रहणेषु [4]न दोषः पथिकानाम्।

631 शङ्खः अप्यपथ्यदलानां तथेक्षोमूलकयोः पु[1]ष्पफलप्रचायने च विदिलस्य प्रकाशं गृह्णतो न दोषः।

साहसप्रकरणम्

[साहसलक्षणम्]

632 शङ्खलिखितौ चौर्यपारुष्यहिंसाः साहसपदवाच्याः ।

[साहसप्रकाराः]

633 शङ्खलिखितौ अनिवेदितप्रवेशो[1] तत्रोत्तमुत्तमायां । विपर्यये मध्यमसाहसम् । प्रतिलोमैकान्तरावस्कन्दने[2] सर्वस्वं वधो वा । विपर्यये सन्निरोधः सर्वस्वं वा ।

[पुत्रादित्यागे दण्डः]

634 शङ्खः पुत्रादीन् यस्त्यजेत्कामात्स द्विशतं दण्डं प्राप्नुयात् ।

[मातापित्राद्यतिक्रमे दण्डः]

635 शङ्खलिखितौ न मातापितरावतिक्रामेन् न गुरुम् ।
त्रयाणां व्यतिक्रमादङ्गच्छेदः ।

[प्रतिमारामादिभङ्गे दण्डः]

636 शङ्खलिखितौ प्रतिमा[1]रामकूपसंक्रम[2]ध्वजसेतुनिपानभङ्गेषु[3] ।
तत्समुत्थापनं[4] प्रतिसंस्कारोऽष्टशतं च[5] ।

[रुधिरस्रावे दण्डः]

637 शङ्खलिखितौ — के[1]शाकेशिग्रहणात् पारजायिकः उल्काहस्तोऽग्निदः। शस्त्रपाणि[2]र्घातकः। लौप्त्रहस्तश्चोरः। शेषेऽष्टशतं यथा[3]नुरूपं वा। रुधिरस्रावे [4]प्रहारैश्चाभिव्यक्ते न साक्षिणः। [5]प्रत्यक्षलिङ्गाभिव्यक्तौ चाष्टशतम्।

[साहसविशेषे दण्डः]

638 शङ्खलिखितौ — सर्वेषां स्वदारनियमः [1]स्वकर्मप्रतिपत्तिश्च [2]धर्मः। [3]येन येनाङ्गेनापराधं कुर्या[4]त्तदस्य छे[5]त्तव्यमष्टसहस्रं वा दण्डः। [6]अन्यत्र ब्राह्मणात्। अदण्ड्यो हि ब्राह्मणः।

639 शङ्खलिखितौ — अन्यूनभावे वैश्यवत् शूद्रस्य कल्प्यम्।

640 शङ्खः — गुणस्य हेतुत्वे तु पीतः।

641 शङ्खः — श्रेयसः शयनशायिनं राजा बद्ध्वा श्वभिः खादयेत् काष्ठैश्चैनां दहेत्।

स्त्रीसङ्ग्रहप्रकरणम्

[कन्यादूषणम्]

642 शङ्खलिखितौ कन्यायामसकामायां द्व्यङ्गुलच्छेदो दण्डश्चोत्तमायां वधो जघन्यस्य सभायां शुल्कमाभरणं द्विगुणं च स्त्रीधनं दत्त्वा प्रतिपद्येत स्वकन्याम् ।

643 शङ्खलिखितौ अनुलोमासु दूषणे तदङ्गच्छेदः । उत्तमासु वधः ।

644 शङ्खः प्रातिलोम्ये वधः पुंसां स्त्रीणां नासादिकर्तनम् ।

645 शङ्खलिखितौ अबुद्धिपूर्वमलङ्कृतो युवा परदारमनुप्रविशन्कुमारीं वाऽवाच्यः । बुद्धिपूर्वं तु दुष्टभावो दण्ड्यः ।

646 शङ्खलिखितौ या स्त्री योन्यङ्गुलिप्रवेशेन कन्यां दूषयेत् तां शिरसो मुण्डनं कृत्वा गर्दभेन राजमार्गे गमनं कारयेत् ।

647 शङ्खलिखितौ क्षत्रियवैश्ययोरन्योन्यस्याभिगमने दण्ड्यावुभौ ।

दायभागप्रकरणम्

[पुत्रप्रशंसा]

648 शङ्खलिखितौ

ब्राह्मणस्तु सवर्णायाः पाणिं गृह्णीयात्[1]। तस्यां हि पितामहानां तनयोऽनुसूयन्ते। पुत्रोपचारेणात्मानम्[2]-नुमन्त्रयते। एवं ह्याह ‡

अङ्गादङ्गात्संभवसि हृदयादभिजायसे ।
आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥
आयत्त पितरौ गर्भं कुमारं पुष्करस्रजम् ।
यथेह पुरुषस्यात्मा तस्मात्त्वमिह[3] जायसे ॥
आत्मा पुत्र इति प्रोक्तः पितुर्मातुरनुग्रहात् ।
पुन्नाम्नस्त्रायते यस्मात्[4] पुत्रस्तेनासि संज्ञितः ॥

649 शङ्खः

पुन्नामा निरयः प्रोक्तश्छिन्नतन्तुश्च नैरयः ।
तत्रैव त्रायते यस्मात्तस्मात्पुत्र इति स्मृतः ॥

650 शङ्खलिखितौ

अग्निहोत्रं त्रयो वेदा यज्ञाश्च शतदक्षिणाः[1]।
ज्येष्ठपुत्रप्रसूतस्य कलां नार्हन्ति षोडशीम् ॥
पुत्रपौत्रप्रतिष्ठस्य बहुपुत्रस्य[2] जीवतः ।
अक्षुण्णवेदयज्ञस्य[3] इष्टाप्राप्तं[4] त्रिविष्टपम् ॥

651 शङ्खलिखितौ

पिता पितामहश्चैव तथैव प्रपितामहः ।
जातं पुत्रं प्रशंसन्ति पिप्पलं शकुना इव ॥

मधुमांसेन खड्गेन पयसा पायसेन वा[1] ।
एष दास्यति नस्तृप्तिं[2] वर्षासु च माघासु च ॥

652 शङ्खलिखितौ पितॄणामनृणो जीवन्[1]दृष्ट्वा पुत्रमुखं पिता ।
स्वर्गी स तेन जातेन तस्मिन्संन्यस्य तदृणम्[2] ॥
पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते ।
अथ पुत्रस्य[3] पौत्रेण ब्रध्नस्याप्नोति[4] विष्टपम् ॥
यत्र क्वचन जातेन पिता पुत्रेण नन्दति ।
तेन चानृणतां याति पितॄणां पिण्डदेन वै ॥

653 शङ्खलिखितौ क्षैत्रिकस्याविज्ञानेन यद्बीजं प्रकीर्यते तत्क्षैत्रिकस्यैव । न तत्र बीजी भागमर्हति ।

654 शङ्खलिखितौ नियतं क्षैत्रिणामपत्यमिति च वेदवादो मातुरपत्यमित्येके ऋषयो वदन्ति द्व्यामुष्यायणमनुमन्त्रयत । तथा[1] वसिष्ठकश्यपयोर्जलगतयोरुदवासादुत्तीर्यैकः प्रजामुत्पादयत्यविज्ञातो लोकानाम् । एवं तयोर्द्विधा सन्तानः । यस्मात्कुलधर्मपरिग्रहरिक्थपिण्डोदकानि चैकतः कृत्वा परक्षेत्रोत्पन्ना अपि प्रयच्छन्ति ।

655 शङ्खलिखितौ मन्त्रसंस्कारकर्तुरपत्यमित्याङ्गिरसः । बीजि[1]क्षैत्रिकयोरनुमते यद्बीजं प्रकीर्यते तद्द्विधा शास्यमित्युशनाः ।

[दायादा अदायादाश्च]

656 शङ्खलिखितौ षट्सु दायादेषु विकल्पः । औरसः क्षेत्रजः पुत्रिकापुत्रः पौनर्भवः कानीनो गूढोत्पन्नश्चेति षट्पुत्रा बन्धुदायादाः पितृपितामहानामेकगोत्राः रिक्थपिण्डार्हाः तेषामर्धं दशधा कुर्यात् । द्वौ भागौ पितुः द्वावौरसस्य त्रीन् क्षेत्रजपुत्रिकापुत्रयोः एकैकमितरेषाम् ।

657 शङ्खलिखितौ अपविद्धः सहोढः दत्तः क्रीतः शूद्रापुत्र उपनतश्च स्वयमित्यदायादाः षडेव पुत्राः । तेषां सारानुसारतः अर्थमपेक्ष्य देयमेतेभ्यः प्रजीवनम् ।

[दायभागकालाः]

658 शङ्खलिखितौ भ्रातॄणां जीवतोः पित्रोः सह भावो विधीयते ।
तदूर्ध्वमपि तेषां च वृद्ध्यर्थं च सह त्रिभिः ॥

659 शङ्खलिखितौ कामं सह[1] वसेयुरेकतः[2] संहता वृद्धिमाप्नुयेरन्[3] ।

660 शङ्खलिखितौ जीवति वा पितरि रिक्थविभागोऽनुमतः । प्रकाशं वा[1] मिथो वा धर्मतः ।

661 शङ्खलिखितौ पितर्यशक्ते[1] कुटुम्बव्यवहारान् ज्येष्ठः कुर्यादनन्तरो वा[2] कार्यज्ञस्तदनुमतेन[3] न त्वकामे पितरि रिक्थविभागो वृद्धे विपरीतचेतसि[4] दीर्घरोगिणि वा[5]

ज्येष्ठ एव पितृवदर्थान्पालयेदितरेषाम् । रिक्थमूलं
हि कुटुम्बकर्म[6] स्वतन्त्राः पितृमन्तो मातर्यप्येवमव[7]-
स्थितायाम्[8] ।

662 शङ्खलिखितौ अत ऊर्ध्वं रिक्थविभागः । न जीवति पितरि पुत्रा[1]
रिक्थं[2] विभजेरन् । यद्यपि स्यात्[3] पश्चादधिगतमेतै[4]-
रनर्हा एव पुत्रा अर्थधर्मयो[5]रस्वातन्त्र्यात् ।

[एकपुत्रविभागः]

663 शङ्खलिखितौ स यद्येक पुत्रः स्याद् । द्वौ[1] भागावात्मनः कुर्यात् ।
द्विपदचतुष्पदेषु रूपमधिकम् । वृषभो ज्येष्ठाय
गृहं यवीयसेऽन्यत्र पितुरवस्थानात् ।

[औरसक्षेत्रजपुत्रिकापुत्रयोर्विभागः]

664 शङ्खः द्वौ भागौ पितुः द्वावेवौरसस्य, त्रयः क्षेत्रज-
पुत्रिकापुत्रयोः, एकैकमितरेषाम् ।

[भूमिभागः]

665 शङ्खः पूर्वनष्टां तु[1] यो भूमिमेकश्चेदुद्धरे[2]त्क्रमात् ।
यथाभागं लभन्ते[3]ऽन्ये दत्वांशं तु[4] तुरीयकम् ॥

[वर्णान्तरजातानां दायभागः]

666 शङ्खलिखितौ अन्यवर्णस्त्रीषु[1] जातानां दायादर्धार्ध[2]हानिर्वर्णक्रमेण

[कन्यांशः]

667 शङ्खलिखितौ विभज्यमाने दायेभ्यः[1] कन्यालङ्कारं[2] वैवाहिकं स्त्रीधनं
च[3] कन्या[4] लभेत ।

668 शङ्खः पैतृकद्रव्यविभागकाले स्वधृतालङ्कारादिकमपि
कन्या प्राप्नोति ।

[शूद्रापुत्रभागः]

669 शङ्खलिखितौ न[1] शूद्रापुत्रोऽर्धभागी । यदेवास्य पिता दद्यात्स एव
तस्य[2] भागो[3] गोमिथुनं[4] चापरं दद्यात्कृष्णायसं कृष्ण-
धान्यं तिलवर्जनम् ।

[अविभजनीयाः]

670 शङ्खलिखितौ न वास्तु[1]विभागो नोदपात्रा[2]लङ्कारोपयुक्त[3]स्त्रीवास-
सामपां प्रचार[4]स्थानां विभागश्चेति प्रजापतिः ।

[अपुत्रभ्रातृविभागः]

671 शङ्खः भ्रातॄणामप्रजाः प्रेयात्[1]कश्चिच्चेत्प्रव्रजेत वा ।
विभजेरन्धनं तस्य शेषास्ते स्त्रीधनं[2] विना ॥
भरणं चास्य कुर्वीरन्स्त्रीणामाजीवनक्षयात् ।
रक्षन्ति शय्यां भर्तुश्चेदाच्छिन्द्युरितरासु च ॥

या तस्य दुहिता तस्य पित्र्यंशो भरणं मतम् ।
आसंस्कारादृरेद्भागं परतो बिभृयात्पतिः ॥

672 शङ्खः गोत्रभागविभागार्थे सन्देहे समुपस्थिते ।
गोत्रजैश्चापरिज्ञाते कुलं साक्षित्वमर्हति ॥

[पुत्राभावे विभागः]

673 शङ्खः पुत्राभावे तु कुर्यातां भर्तृभार्ये परस्परम् ।
अपुत्रस्य तु या पुत्री सैव पिण्डप्रदा भवेत् ॥

674 शङ्खः पुत्रिका पुत्रवदिति प्रचेतसः । तस्यापत्यं पुत्रिकासुतो मातामहपितामहाभ्यां पिण्डदः ।
पुत्रदौहित्रयोर्लोके न विशेषोऽस्त्यनुग्रहे ।
तस्मात्तु संश्रयान्नेहोपेयादभ्रातृकां स्त्रियम् ॥

[पूर्वाभावे परस्परदायग्रहणम्]

675 शङ्खलिखितौ रासभोऽधिको ज्येष्ठस्य तस्याभावे क्षेत्रजपुत्रिकासुतयोस्तयोरप्यभावे त्रयाणामितरेषाम् । तेषामभावे सवर्णानामदायादानां सर्वरिक्थग्रहणम् ।

[अरिक्थभाजः]

676 शङ्खलिखितौ यज्ञार्थं द्रव्यमुत्पन्नं तत्रानधिकृतास्तु ये ।
अरिक्थभाजस्ते सर्वे ग्रासाच्छादनभाजनाः ॥

[श्रेयसोऽलाभे दायभागिनः]

677 शङ्खलिखितौ

श्रेयसः श्रेयसोऽलाभे पापीयान्रिक्थमर्हति ।
बहवश्चेत्तु सदृशाः सर्वे रिक्थस्य भागिनः ॥

[देशान्तरगतोऽपि पुत्रोऽधिकारी]

678 शङ्खः भार्यामरणपक्षे वा देशान्तरगतोऽपि वा ।
अधिकारी भवेत्पुत्रो महापातकिनोऽपि वा ॥

[संसृष्टानां भागः]

679 शङ्खः संसृष्टानां तु यो भागस्तेषामेव स इष्यते ।

[अपुत्रस्य दायभागिनः]

680 शङ्खलिखितपैठीनसियमाः

अथापुत्रस्य स्वर्यातस्य भ्रातृगामि द्रव्यं तदभावे मातापितरौ लभेतां पत्नी वा ज्येष्ठा सगोत्रशिष्य-सब्रह्मचारिणः ।

[भ्रातृभार्यास्नुषादीनां पिण्डदानेऽधिकारः]

681 शङ्खः भ्रातृभार्याणां स्नुषाणां च न्यायतः प्रवृत्तानामन-पत्यानां पिण्डमात्रं गुरुर्दद्यात् जीर्णानि वासांस्य-विकृतानि ।

[प्रेतकार्याण्यकृत्वा धनं न हार्यम्]

682 शङ्खः अकृत्वा प्रेतकार्याणि प्रेतस्य धनहारकः ।
वर्णानां यद्वधे प्रोक्तं तद्व्रतं नियतश्चरेत् ॥

[पुत्रिकायाः द्रव्याधिकारी न भर्ता]

683 शङ्खलिखितौ प्रेतायाः पुत्रिकायास्तु न भर्ता द्रव्यमर्हति ।

[मातृकरिक्थाधिकारः]

684 शङ्खः स्वं च शुल्कं वोढा ।

685 शङ्खलिखितौ समं सर्वे सोदर्या मातृकं रिक्थमार्हन्ति
कुमार्यश्च ।

[स्त्रीधनाधिकारिणः]

686 शङ्खलिखितौ
स्त्रीधनं कन्या लभते तदपत्यस्य च द्रव्यं कन्याभाग एव ।

[अपात्रस्य न दायभागः]

687 शङ्खलिखितौ
अपात्रितस्य रिक्थपिण्डोदकानि व्यावर्तन्ते ।

[आमयग्रस्तानां सुताः भागहारिणः]

688 शङ्खलिखितनारदाः
दीर्घं तीव्रामयग्रस्ता ये जडोन्मत्तपङ्गवः ।
भर्तव्याः स्युः कुलस्यैते तत्सुता भागहारिणः ॥

[अपुत्रधनविभागः]

689 शङ्खलिखितौ
परिषद्गामि वा श्रोत्रियद्रव्यं न राजगामि । न हार्यं राज्ञा देवब्राह्मणसंस्थितम् । न निक्षेपोपनिधिक्रमागतम् । न बालस्त्रीधनानि । एवं ह्याह
न हार्यं स्त्रीधनं राज्ञा तथा बालधनानि च ।
तार्याः षडागमं वित्तं बालानां पैतृकं धनम् ॥

690 शङ्खलिखितौ
रक्षेद्राजा बालानां धनानि अप्राप्तव्यवहाराणां श्रोत्रियवीरपत्नीनां प्रहीणस्वामिकानि राजगामीनि भवन्ति ।

प्रायश्चित्ताध्यायः

आशौचप्रकरणम्

[क्रिया पुत्रेण कार्या]

691 शङ्खः मृते पितरि पुत्रेण क्रिया कार्या विधानतः ।

[मातापित्रोर्जननाशौचम्]

692 शङ्खलिखितौ स्नानोपस्पर्शनादेव पिता शुद्धः नाडीच्छेदनात्परं दशरात्रपर्यन्तं मातुरप्यङ्गाशौचम् ।

[उदकदानादिकम्]

693 शङ्खलिखितौ उदकक्रिया कामं श्वशुरमातुलयोः शिष्ये सहाध्यायिनि राजनि च ।

694 शङ्खः प्रेतस्य बान्धवा यथावृद्धमुदकमवतीर्य नोद्धर्षयेरं[1]स्ते प्रसिञ्चेरन्सकृत्प्राग्दक्षि[2]णाभिमुखाः । राजन्यवैश्यावप्यपस[3]व्यं वाससी यज्ञोपवीते कृत्वा [4]आसावेतत्ते ।

695 शङ्खलिखितौ उत्तीर्य प्रेतस्पृष्टानि वासांस्युत्सृज्येतराणि परिधाय गृहद्वारे तस्मै प्रेताय पिण्डं दत्त्वा पश्चाद् दूर्वाप्रवालान्गोमयमग्निं जलं वृषभं चालभ्य प्रविशन्तो धृतगौरसर्षपैर्मूर्धानमङ्गानि चालभेरन् ।

696 शङ्खः दुर्वाप्रवालमग्निं वृषभं चालभ्य गृहद्वारे प्रेताय
पिण्डं दत्त्वा पश्चात्प्रविशेयुः।

697 शङ्खलिखितौ शस्त्रपाणयो यथोक्तकालनियमाः प्रेतायावश्यका-
न्युभयकालं कुर्युः। भूमौ माल्यं पिण्डं पानीयं उप-
लेपानि वा दद्युः। तत्कालमनध्यायी गोव्रतः
पर्युपासनं च।

[दशाहार्दर्वाग् बालाशौचम्]

698 शङ्खः बालस्त्वन्तर्दशाहे तु प्रेतत्वं यदि गच्छति।
सद्य एव विशुद्धिः स्यान्नाशौचं नैव सूतकम्॥

699 शङ्खः अन्तर्दशाहोपरतस्य सूतिकाहोभिरेवाशौचम्।

700 शङ्खः अनिवृत्ते दशाहे तु पञ्चत्वं यदि गच्छति।
मातुः प्रासविके शौचमुपस्पृश्य पिता शुचिः॥

701 शङ्खः दशमासगते बाले शुद्धिस्याज्जन्मना सह।

[बालाशौचम्]

702 शङ्खः प्राङ्नामकरणात्सद्यः शुद्धिः।

703 शङ्खः चतुर्थे दशरात्रं स्यात्षण्णिशाः पुंसि पञ्चमे।
षष्ठे चतुरहाच्छुद्धिः सप्तमे त्वहरेह तु॥

704 शङ्खलिखितौ
जनन्येऽप्येवं तेषां तत्र मातापितरावशुचीमातेत्येके।

705 शङ्खः जनने मरणे चैव सपिण्डानां द्विजोत्तमः।
त्र्यहाच्छुद्धिमवाप्नोति योऽग्निवेदसमन्वितः॥

706 शङ्खः अजातदन्तासु पित्रोरेकरात्रम्।

707 शङ्खः अजातदन्ते बाले तु सद्यः शौचं विधीयते।
अहोरात्रात्तथा शुद्धिर्बाले तु कृतचूडके॥
तथैवानुपनीते तु त्र्यहाच्छुध्यन्ति बान्धवाः॥

708 शङ्खलिखितौ बाले चातीते सद्यः शौचं सगुणानामात्रिवर्षात्।

[सापिण्ड्यनिर्णयः]

709 शङ्खलिखितौ सपिण्डता तु सर्वेषां गोत्रतः साप्तपौरुषी।
पिण्डं चोदकदानं च शौचं चैव तदानुगम्॥

[सपिण्डानामाशौचम्]

710 शङ्खः सपिण्डे ब्राह्मणे वर्णाः सर्व एवाविशेषतः।
दशरात्रेण शुध्येयुरित्याह भगवान्यमः॥
सपिण्डे क्षत्रिये शुद्धिः षड्रात्रं ब्राह्मणस्य तु।
वर्णानां परिशेषाणां द्वादशाहेन निर्दिशेत्॥
त्रिरात्रमथ षड्रात्रं पक्षं मासं तथैव च।
वैश्ये सपिण्डे वर्णानामाशौचं क्रमतः स्मृतम्॥

एकरात्रं त्रिरात्रं वा षड्रात्रं मासमेव च ।
शूद्रे सपिण्डे वर्णानामशौचं क्रमतः स्मृतम् ॥

[मातामहादिमरणाशौचम्]

711 शङ्खः मातामहे तथातीते आचार्ये तु तथा मृते ।
गृहे मृतासु कन्यासु दत्तासु च तथा त्र्यहम् ॥
निवासराजनि प्रेते जाते दौहित्रके तथा ।
आचार्यपत्नीपुत्रेषु मृतेषु दिवसेन तु ॥
मातुले पक्षिणी रात्रिः शिष्यर्त्विग्बान्धवेषु च ।
स ब्रह्मचारिण्येकाहमनूचाने मृते तथा ॥

~~[अनौरसपुत्रादिमृतेष्वाशौचम्]~~

712 शङ्खः आचार्ये चैवं मातामहयोश्च स्त्रीणां चाप्रत्तानां
कुर्वीरंस्ताश्च तेषाम् ।

[अनौरसपुत्रादिमृतेष्वाशौचम्]

713 शङ्खः अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च ।
परपूर्वासु च स्त्रीषु त्रिरात्राच्छुद्धिरिष्यते ॥

714 शङ्खः मृते सुते तु दासानां पुत्राणां चानुलोमिनाम् ।
स्वामितुल्यं भवेच्छौचमृते स्वामिनि यातकम् ॥

[ऊढायाः कन्याया आशौचम्]

715 शङ्खलिखितौ एकाहं कन्यायामूढायां पुनर्गोत्रतः[1] पिण्डशौचयोर्निवृत्तिः ।

[अनूढायां मृतायामाशौचम्]

716 शङ्खः पितृवेश्मनि या नारी रजः पश्यत्यसंस्कृता ।
तस्यां मृतायां नाशौचं कदाचिदपि शाम्यति ॥

[बान्धवानामाशौचम्]

717 शङ्खः त्र्यहं[1] योनिबन्धूनामाशौचं दहनादिषु[2] ।

718 शङ्खलिखितौ आशौचं तु त्रिरात्रं स्यात् सामानामिति निश्चयः ।

[दाहादूर्ध्वमाशौचम्]

719 शङ्खः मरणादेव कर्तव्यं[1] संयोगो यस्य नाग्निना[2] ।
दाहादूर्ध्वमाशौचं स्याद्यस्य[3] वैतानिको विधिः ॥

[गर्भस्रावाशौचम्]

720 शङ्खलिखितौ गर्भमाससमा रात्रीः स्रंसने गर्भस्य त्र्यहं वा ।
सर्वेषां सकुलानाम् ।

[शूद्रादीनामाशौचम्]

721 शाङ्खः अनूढानान्तु कन्यानां तथा वै शूद्रजन्मनाम् ।
अनूढभार्यः शूद्रस्तु षोडशात्वत्सरात्परम् ॥
मृत्युं समधिगच्छेत्तु मासात्तस्यापि बान्धवाः ।
शुद्धिं समधिगच्छन्ति नात्रकार्या विचारणा ॥

[वर्णानुलोम्येनाशौचम्]

722 शाङ्खः वर्णानामानुलोम्येन स्त्रीणामेको यदा पतिः ।
दशाहषट्त्र्यैकाहः सूतके मृतके तथा ॥

[ब्रह्मचारिणामाशौचम्]

723 शाङ्खलिखितौ जनने मरणे चैव नाशौचं ब्रह्मचारिणाम् ।
पित्रोर्मरण एव स्यादाशौचमुदकं तथा ॥

[हीनवर्णनार्याः प्रसवे मरणे चाशौचम्]

724 शाङ्खः हीनवर्णा तु या नारी प्रमादात्प्रसवं व्रजेत् ।
प्रसवे मरणे तज्जन्मशौचं नोपशाम्यति ॥
।(चैव तदशौचं न शाम्यति)

[शस्त्रादिभिः प्रमापणे आशौचम्]

725 शाङ्खलिखितौ अथ शस्त्रानाशकाग्नि - रज्जु - भृगु - जलविषप्रमापणे
ष्वेवमेव ।

726 शङ्खः भृगवग्न्यनाशकाम्भोभिः मृतानामात्मघातिनाम् ।
पतितानां च नाशौचं शस्त्रविद्युद्धताश्च ये ॥

727 शङ्खः व्यापादयेदथात्मानं स्वयं योऽग्न्युदकादिषु ।
विहितं तस्य नाशौचं नाग्निर्नाप्युदकक्रिया ॥

728 शङ्खः अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादिषु ।
तस्याशौचं विधातव्यं कार्या चास्योदकक्रिया ॥

[अतिक्रान्ताशौचम्]

729 शङ्खलिखितौ अथ यदि दशरात्राः सन्निपातेयुः पुराधं दशरात्र-
मादिवसादत ऊर्ध्वं त्रिरात्रेण व्युष्टायां त्रिरात्रेण ।

730 शङ्खः ऊर्ध्वं दशाहाच्छ्रुत्वैकरात्रम् ।

731 शङ्खः समानाशौचसंपाते प्रथमेन समापयेत् ।
असमानं द्वितीयेन धर्मराजवचो यथा ॥

732 शङ्खः अतीते सूतके स्वे स्वे त्रिरात्रं स्यादशौचकम् ।
संवत्सरे व्यतीते तु सद्यः शौचं विधीयते ॥

733 शङ्खः अतीते दशरात्रे तु त्रिरात्रमशुचिर्भवेत् ।
तथा संवत्सरेऽतीते स्नात एव विशुध्यति ॥

[आशौचसंनिपाते]

734 शङ्खः मातर्यादौ परीतायामशुद्धौ म्रियते पिता।
पितुः शेषेण शुद्ध्येत्तु मातुः कार्या तु पक्षिणी॥

735 शङ्खलिखितौ अथ चेदन्तरा [1]प्रमीयेत जायेत [2]वावशिष्टैरेव [3]दिवसैः शुद्ध्येत। अहः शेषे द्वाभ्याम्। प्रभाते [4]तिसृभिः।

[देशान्तरमरणे]

736 शङ्खलिखितौ देशान्तरिते बाले चातीते सद्यः शौचम्।
य [1]ऊनत्रिवर्षः स्यादनुत्पन्न[2]दन्तक इत्येके॥

737 शङ्खः देशान्तरगतं श्रुत्वा कल्याणं मरणं तथा।
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत्॥

[अन्यपूर्वभार्यादीनां नाशौचम्]

738 शङ्खलिखितौ अन्यपूर्वासु भार्यासु कृतकेषु सुतेषु [1]च
नानध्यायो भवेत्तस्य नाशौचं नोदकक्रिया॥

739 शङ्खः अन्यपूर्वा गृहे यस्य भार्या स्यात्तस्य नित्यशः।
अशौचं सर्वकार्येषु गेहे भवति सर्वदा॥

[राजादीनां नाशौचम्]

740 शङ्खलिखितौ राजा धर्मायतनं सर्वेषाम् । तस्मादनवरुद्धः प्रेतप्रसवदोषैः ।

741 शङ्खलिखितौ राज्ञां[1] पुरोहितोऽमात्यः शुद्धिस्तस्य तदाशया[2] ।
शिष्यस्य[3] पैतृकं शौचं [4]गुरुरेव प्रपद्यते ॥

742 शङ्खलिखितौ मातापित्रोरुपासीने न गुरुः प्रतिपद्यते ।
पिण्डोदकं तु जनकगोत्रमेव प्रपद्यते ॥

743 शङ्खलिखितौ उपासीने तत्समीपवासिनि ब्रह्मचारिणि ।

[त्रिषु पिण्डाः]

744 शङ्खः पिण्डस्त्वावर्तते त्रिषु ।

[प्रेतालङ्करणे असपिण्डस्य प्रायश्चित्तम्]

745 शङ्खः कृच्छ्रपादोऽसपिण्डस्य प्रेतालङ्करणे कृते ।
अज्ञानादुपवासः स्यादशक्तौ स्नानमिष्यते ॥

[आशौचे पुत्रजन्मनि तात्कालिकी शुद्धिः]

746 शाङ्खः आशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत् ।
कर्तुस्तात्कालिकी शुद्धिः पूर्वशौचेन शुद्ध्यति ॥

747 शाङ्खः आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि ।
कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः ॥

[अग्निहोत्रार्थं सद्यः शौचम्]

748 शाङ्खलिखितौ अग्निहोत्रार्थं स्नानोपस्पर्शनादेव पिता शुचिः ।

749 शाङ्खः एकपिण्डाः पृथक्शौचाः ।

[आशौचे वर्ज्यम्]

750 दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च ।
प्रेतपिण्डक्रियावर्जमाशौचे विनिवर्तते ॥

आपद्धर्मप्रकरणम्

751 शङ्खलिखितौ

आपत्काले [1]ब्राह्मणस्य मातापितृगतौ बहुभृत्यस्या-
नन्तरिका वृत्तिरिति [2]विकल्पः । [3]तत्र ब्राह्मणेषु
[4]चरित्रगुणसंपन्नवृत्तेर्दौर्बल्यमा[5]ख्यातम् । यद्वृ-
त्तौ स धर्मः । [6]तस्यानन्तरा [7]वृत्तिः क्षात्त्रोऽभिनिवेशः ।
त्रयाणां व्यावृत्तौ [8]याज्ययाजनाध्यापनप्रतिग्रहाणा-
मेवमप्यजीवन्वैश्य[9]वृत्तिमेवोपजीवेत् ।

752 शङ्खलिखितौ

तस्य स्वधर्म एव श्रेयान्स्वल्पोऽप्यनुष्ठितो
[1]नावरं सेवेत । [2]जघन्यसेवी हि ब्राह्मणो [3]जघन्यो-
ऽवपद्यते, तस्मात्प्रशस्तसम[4]र्याचारं सर्वतः
प्रतिगृह्णीयान्नात्मनस्तु[5] ततस्तृप्तिमिच्छेत् । कामं
त्रयाणां वर्णानां याजनं [6]कुर्वीत. [7]धर्मेण तेभ्यो
वृत्तिमादाय धर्मकृत्येषूपहरेत् ।

753 शङ्खलिखितौ

[1]शुष्ककाष्ठबदरेङ्गुदबिल्व[2]रज्जुकार्पासिकसूत्रैरविकृतै-
र्द्रव्यमाहरेत् ।

754 शङ्खलिखितौ

[1]आपदि कामं ब्राह्मणो जिजीविषुरेकान्तरितां
वृत्तिमास्थाय [2]न पण्यं पण्यामीति ब्रूयात् ।
[3]सकृदेवोक्तं मूल्यमिच्छेत् । [4]गां वा रक्षेत् । तासु
[5]नापीतासु पिबेत् । [6]न तिष्ठन्तीषूपविशेत् । न
स्वयमुत्थापयेत् । [7]ग्रामैरार्द्रशाखया [8]सपलाशया
पृष्ठतोऽ[9]भिहन्यात् । [10]नातीर्थेन विषमेणा[11]ल्पोदकेन
वा तारयेत् । बाल[12]वृद्धरोगार्ताः [13]श्रान्ता उपावेशयेत् ।
शक्तितः [14]प्रतीकारं कुर्यात् । [15]गवामेव धर्मोऽन्यथा
[16]विप्लवः ।

755 शङ्खलिखितौ

न विक्रीणीयादविक्रेयाणि । [1]तिलदधिक्षौद्र-
लवण[2]लाक्षामद्यमांसकृतान्नस्त्रीपुरुषहस्त्यश्व[3]गोवृष-
गन्धरस[4]क्षौमकृष्णाजिनसोमोदक[5]नीलविक्रयात्
सद्यः पतति ब्राह्मणः

756 शङ्खलिखितौ

एवमप्यजीवन् वैश्यवृत्तिमेवोपजीवेत्तत्र संवत्सर
सत्राणामाधारमुद्धृत्य शेषेण द्रव्यमाहरेत् । अन्यत्र
पुष्परसगन्धमद्यमांसौदनतिलशाकदधिपयः सोम-
जलमधुनीलकौशेयपानभक्ष्यजतुलोहपाषाणकुतप-

शास्त्रविषमानुक्षौमकृष्णाजिनकौशकप्रभृतिभ्यः ।

[वानप्रस्थधर्मप्रकरणम्]

757 शङ्खलिखितौ

पुत्रानुत्पाद्य संस्कृत्य वेदमध्याप्य वृत्तिं विधाय
दारैः संयोज्य गुणवति पुत्रे कुटुम्बमावेश्य
कृतप्रस्थानलिङ्गो वृत्तिविशेषानुक्रमेत् । ग्रामश्चो
यायावराणां वृत्तिमुपास्य वनमाश्रयेदुत्तरायणे
पूर्वपक्षे ।

758 शङ्खलिखितौ स्वपत्नीं पुत्रमाहूय ज्ञातव्यम् ।

759 शङ्खः गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः ।
अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् ॥

760 शङ्खः पुत्रे दारान्विनिक्षिप्य तथा वानुगते वने ।
अग्नीनुपाचरेन्नित्यं वन्यमाहारमाहरेत् ॥

761 शङ्खः यदाहारो भवेत्तेन पूजयेत्पितृदेवताः ।
तेनैव पूजयेद्विप्रानतिथिं समुपागतम् ॥

762 शङ्खः ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान्समाहितः ।

763 शङ्खः स्वाध्यायं च तथा कुर्याज्जटाश्च बिभृयात्तथा ।

764 शङ्खः तपसा शोषयेन्नित्यं स्वकं चैव कलेवरम् ।
आर्द्रवासास्तु हेमन्ते ग्रीष्मे पञ्चतपास्तथा ॥
प्रावृष्याकाशशायी च नक्ताशी च सदा भवेत् ॥

765 शङ्खः चतुर्थकालिको वा स्यात्षट्कालिक एव वा ।
कृच्छ्रैर्वापि नयेत्कालं ब्रह्मचर्यं च पालयेत् ।
एवं नीत्वा वने कालं द्विजो ब्रह्माश्रमी भवेत् ॥

766 शङ्खः ऊर्ध्वं वार्षिकाभ्यां मासाभ्यां नैकस्थानवासी ।

767 शङ्खः नाग्निशुश्रूषया दान्त्या स्नानेन विविधेन च ।
वानप्रस्थो दिवं याति याति भोजनवर्जनात् ॥

यतिधर्मप्रकरणम्

768 शङ्खलिखितौ अक्रोधं आर्जवं शौचं व्यवहारो गुरुशुश्रूषा चेति नियमाः पञ्च ।

769 शङ्खः काले शक्तितः शरीरं शोषयेद्यमनियममन्त्रोपवासा-
दिभिः। कुशचीरचर्मवल्कलवासा जटी कृष्णाजिनो-
त्तरीयो जलशयनपञ्चतपाश्चावकाशनियमपरः।

770 शङ्खः अशुचित्वशुचित्वस्य प्रियाप्रियविपर्ययान्।
गर्भवासे च वसतिं पश्येन्मुच्येत नान्यथा॥

771 शङ्खः पूर्वरात्रापररात्रेषु योगी नित्यमतन्द्रितः।
ध्यायेत्तु पुरुषं विष्णुं निर्गुणं पञ्चविंशकम्॥

772 शङ्खः मनः संयमनात्तज्ज्ञैर्धारणेति निगद्यते।

773 शङ्खः यथा पृथिव्यां बीजानि रत्नानि निधयो तथा।
एवमात्मनि कर्माणि तिष्ठन्ति प्रभवन्ति च॥

774 शङ्खः एकरात्रं वसेद्ग्रामे नगरे पञ्चरात्रकम्।
वर्षाभ्योऽन्यत्र वर्षासु मासांश्च चतुरो नयेत्॥

775 शङ्खः त्रिदण्डकुण्डी पक्षमपवित्रप्रयोजनापेक्षी, मुण्डः,
काषायवासा, भैक्ष्यवृत्तिरसंनिधिरगारवर्जितोऽभिशस्त-
पतितनिन्दितोपकृतवर्जी कौपीनमात्रवासा -

व्रणमात्रलेपनपरितुष्टः पक्वकालाय, कालाकाङ्क्षी;
सदायुक्तआत्मरतिरसंविधानशीलः, कुहककल्क-
दम्भापवर्जितः, सदा नैकग्रामचारी, सङ्कोचात्
पर्वहनशीलः, सदालोकागविलोकार्थकुशल ऊर्ध्वं
वर्षाभ्यो नैकदेशमूत्रपुरीष उद्धृतपरिपूताभिरद्भिः
कार्यं कुर्यात्। दण्डपवित्रपाणिः द्विपरिधानी, कुश-
चीरवल्कलकचासौ शीतप्रावरणमेकम्।

776 शङ्खलिखितौ
शीतोष्णवातवर्षाणि नात्यन्तं परिहरेत्। नात्मनः
प्रतिकारं कुर्यात्। न कारयेन्नानुगच्छेत।

777 शङ्खः
सभागारं चरेद्भिक्षां भिक्षुकं नानुभिक्षयेत्।
नास्वादयेद्रसनया नाश्नीयात्कस्यचिद्गृहे॥

778 शङ्खलिखितौ
भिक्षमाणो वा निमित्तान्तरं ब्रूयात्। न रक्षावतारं
कुर्यात्। न स्त्रीं नाप्राप्तव्यवहाराम्पर्याप्तसन्निधाना-
ननुद्दिष्टान्नं भिक्षेत्।

779 शङ्खः
संन्यस्याचार्यमुपतिष्ठेत ब्रह्मजिज्ञासायाम्।

780 शङ्खलिखितौ

काष्ठालाबुविदलपार्थिवानामेकभैक्षभाजनम् ।
न[1] तत्र गोवालरज्वा सोदकं परिस्रवणम् ।
प्रात्यात्मिकं[2] शौचम् । नात्राचामेन्न भूमौ निक्षिपेत् ।
नाशुचिः संस्पृशेत् । भुक्त्वा चान्तः पुनराचाम्य
द्रव्याण्यभ्युक्षयेदुक्तं[3] च कच्चाद्यदारोक्षं स्यात् ।

781 शङ्खलिखितौ
वनवासादूर्ध्वं शान्तस्य परिणतवयसः[1] कामतः
प्रव्रज्या[2], तमेवाग्निमात्मन्यारोप्य व्यपगतभयक्लेश[3]-
मोहक्रोधशोकस्नेहमदमत्सरः कामं[4] जागुप्सितवेदन-
वस्थितत्वान्मनसः श्रद्धा ह्यनियता भवति ।
तस्मात् श्वः श्वः समुपासीत[5] । तदहरेव राजसो-
त्सर्गारम्भपरिग्रहाननुसृज्य ।

782 शङ्खः
पृथिव्यापस्तथा तेजो वायुराकाशमेव च ।
पञ्चैतानि विजानीयान्महाभूतानि पण्डितः ॥
श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
बुद्धीन्द्रियाणि जानीयात् पञ्चैवास्मिञ्छरीरके ॥
मनो बुद्धिस्तथात्मा अव्यक्तं च तथैव च ।
इन्द्रियेभ्यः पराण्याहुश्चत्वारि कथितानि तु ॥
शब्दं रूपं तथा स्पर्शं रसं गन्धं तथैव च ।
इन्द्रियार्थान् विजानीयात् पञ्चैव सततं बुधः ॥

हस्तपादावुपस्थं च जिह्वा पायुस्तथैव च ।
कर्मेन्द्रियाणि पञ्चैव नित्यास्मिञ्छरीरके ॥
चतुर्विंशति तत्त्वानि एतानि कथितानि तु ।
तथात्मानं तु तं विद्धि पुरुषं पञ्चविंशकम् ॥
वालाग्रशतिमो भागः कल्पितस्तु सहस्रशः ।
तस्यापि शतिमाभागाज्जीवः सूक्ष्म उदाहृतः ॥

753 शाङ्खः हृत्स्थस्य ध्यानयोगेन देवदेवस्य दर्शनम् ।
ध्यानं प्रोक्तं प्रवक्ष्यामि ध्यानयोगमतः शुभम् ॥
हृदिस्था देवताः सर्वा हृदि प्राणः प्रतिष्ठितः ।
हृदि ज्योतींषि सूर्यश्च हृदि सर्वं प्रतिष्ठितम् ॥
स्वदेहमरणिं कृत्वा प्रणवं तूत्तरारणिम् ।
ध्याननिर्मन्थनाभ्यासाद्विष्णुं पश्येद्धृदि स्थितम् ॥
रविमध्ये स्थितः सोमः सोममध्ये हुताशनः ।
तेजोमध्ये स्थितं सत्त्वं सत्त्वमध्ये स्थितोऽच्युतः ॥
अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः ।
तेजोमयं पश्यति वीतशोको धातुप्रसादान्महिमानमीशम् ॥
एष देवस्तु मर्त्यानां पटैरिव विधीयते ।
अज्ञानपटसंवीतैरिन्द्रियैर्विषयैः श्रुतिः ॥

एष वै पुरुषो विष्णुर्व्यक्ताव्यक्तः सनातनः ।
एष धाता विधाता च प्रधानं निष्कलः शिवः ॥
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तं वै विदित्वा न बिभेति मृत्योर्नान्यः पन्था विद्यतेऽयनाय ॥

प्रायश्चित्तप्रकरणम्

[कर्मविपाकाः]

784 शङ्खलिखितौ

कुम्भीपाक -- रौरव - महारौरव - कूटशाल्मलि-
शिलासंघात - वज्रकण्टकशयनान्यसिपत्रवनान्य-
यस्तुण्डाः पाशाः पूयशोणितकर्दमः केशवत्कुम्भ-
शैवालाः क्षारनद्यो ज्वलिताङ्गारकुण्डा रक्तपाकरम्भा-
वालुकानिस्त्रिंशमुद्गरनिपाताः सूचिप्रतोदवेध्याः
अल्पोदकाः साग्निगर्ताः प्रदीप्ताय:पिण्डलोहकण्टक-
शयनानि नरकपञ्जराणि कालसूत्राणि तीक्ष्णाग्राश्च
शूलाः श्यामशबलौ वज्रदंष्ट्रिणौ तप्तोदका वैतरणी
एतेषु पच्यन्ते पापकर्मिणः ।

785 शङ्खलिखितौ

अत ऊर्ध्वं बहूनि वर्षसहस्राणि यमविषये
कुम्भीपाकरौरवादिषु स्थानेषु दुःखान्यनुभूयेह
जातानामिमानि लक्षणानि भवन्ति । तद्यथा
भस्मा कुष्ठी गोघ्नश्चाप्यनेकरोगिणश्च ।

786 शङ्खलिखितौ

सुवर्णस्तेयी कुनखी वस्त्रापहारी श्वित्री । हिरण्यापहारी
दद्रुणः । तैजसापहारी मण्डली । स्नेहापहारी क्षयामयी
अजीर्णवानन्नापहारी । वागपहारी मूकः । गृध्रो
देवद्रव्योपहसंजीवकः । पाण्डुरोगी दीपहारी । ब्राह्मण-
वृत्तिभ्रष्टश्च दरिद्रः । कर्मफलविशेषेण कुब्जषण्ढपङ्गु-
दरिद्राश्च जायन्ते ।

787 शङ्खः

ब्रह्महा कुष्ठी । तैजसापहारी[1] मण्डली । देवब्राह्मणा-
क्रोशकः खल्वाटः । गरदाग्निदावुन्मत्तौ[2] । गुरुं[3] प्रति-
हन्तापस्मारी । गोघ्नश्चान्धः[4] । धर्मपत्नीं मुखवाद्यत्र[5]
प्रवृत्तः शब्दवेधी[6] प्राणिविक्रोशः । कुण्डाशी[7] भग-
भङ्गो[8] देवब्राह्मणस्वापहारी[9] पाण्डुरोगी । न्यासापहारी[10]
काणः । स्त्रीपण्योपजीवी[11] षण्ढः । कौमारदारत्यागी
दुर्भगः । मिष्टैकाशी वातगुल्मी । अभक्ष्यभक्षको गण्ड-
माली । ब्राह्मणीगामी[12] निर्बीजी । क्रूरकर्मा[13] वामनो ।
वस्त्रापहारी[14] पतङ्गः । शय्यापहारी[15] क्षपणकः । शङ्ख-
शुक्त्यपहारी कपाली । दीपापहारी कौशिकः ।
मित्रधुक् क्षयी । मातापित्रोराक्रोशकः कारण्डकः[16] इति ।

७४४ शङ्खलिखितौ

वेश्यापहारी अद्रिसर्पः । परजालापहारी शिशुमारः । सस्यापहारी कपोतः । क्रव्यापहारी वायसः । ताम्रापहारी वल्गुलः । अपूपापहारी प्रेतः । शास्त्रापहारी जडः । छत्रापहारी कारण्डवः । गन्धापहारी पतङ्गः । ध्वजापहारी कृकलासः । शाकापहारी पशुः । शय्यापहार्यशयनः । पुष्पापहारी दुर्गन्धी । फलापहार्यफली । दीपापहारी कौशिकः । भूम्यपहारी नकुलाहि बिडालाखूनामन्यतमः । इति ।

यद्वा तद्वापि पारक्यं स्वल्पं वा यदि वा बहु ।
हृत्वा वै योनिमाप्नोति तत्तद्रोगानुरूपतः ॥

७४९ शङ्खलिखितौ

पर्वमैथुनी प्रमेही । पुरुषव्याधिपीडितः । परदारगाम्यगुप्तदारः । गोष्ववकीर्णी दुश्चर्मा । स्वराभिगामी मूत्रमेही । सगोत्राभिगामी मद्यपस्त्रीगामी च श्लीपदी । मातृपितृभगिनीगाम्यबीजी । धर्मपत्न्यामास्ये प्रवर्तकः खल्वाटः । भ्रातृभगिनीगाम्यवकीर्णी श्लीपदी वधी मधुमेही च ।

[महापातकप्रायश्चित्तानि]

790 शङ्खलिखितौ

ब्रह्महा त्रिरात्रोपोषितोऽन्तर्जलेऽघमर्षणं त्रिरात्र-
वर्तयेत् । गुरुतल्पगः पवित्रमृषभः सुवर्णस्तेयी
रुद्राध्यायी सुरापो मध्याह्ने कुष्माण्डैर्घृतहोमं कुर्यात् ।
हिरण्यस्तेनश्चजसृभि हिरण्यवर्णाभिरात्मानमभ्युक्ष्य
हिरण्यमप्सु निदध्यात् ।

तथा

सोमेभ्यः स्वाहेत्यथवा दिवसं मारुताशनः ।
जले स्थित्वाभिजुहुयात् चत्वारिंशद् घृताहुतिः ॥

[संप्रयोगः पञ्चमं महापातकम्]

791 शङ्खः तैश्च सह संप्रयोगश्च पञ्चमः पातकी ।

[उपपातकानि]

792 शङ्खः अत ऊर्ध्वमुपपतनीयानि — कन्यादूषी सोमविक्रयी
वृषलीपतिः कौमारदारत्याग्यसुरामद्यपायी गोघ्नः
भ्रूणवधी गुरोः प्रतिहन्ता नास्तिकः कृतघ्नः कूटव्यवहारी
वृत्तिघ्नो मिथ्याभिशंसी हिरण्यस्तेनः पतितसंव्यवहारी
मित्रध्रुक् शरणागतघाती प्रतिकूलवृत्तिरित्येतान्यष्टादशो-
पपातकानि ।

793 शङ्खलिखितौ
कृतघ्नः कूटव्यवहारी ब्राह्मणवृत्तिघ्नो मिथ्याभिशंसी
पतितात्यागी अभोज्यभोजी असत्प्रतिग्रही ।

[प्रायश्चित्तहेतवः]

794 शङ्खलिखितौ कृच्छ्राणि द्विजातीनामेव नावरस्य कामं धर्मेच्छोरप्रतिषेधः।

795 शङ्खलिखितौ साधारणो हि धर्मो नियमाश्च अवरस्य शूद्रस्य वेदमन्त्र-
सहितस्य प्रायश्चित्तस्य निषेधः तद्रहितस्याभ्यनुज्ञा ।
यद्वा रागद्वेषाद्धल्भ्यमानेषु प्रायश्चित्तेषु यज्ञहवनाध्ययन-
ब्रह्मचर्यपरो भैक्ष्याशी दण्डी मेखली स्वयमेव संवत्सरेण
महापापतत्परो व्यपोहति इति किल्बिषा न ब्राह्मणस्य
पतनमिच्छन्त्याचार्याः ।

[प्रायश्चित्तनियमाः]

796 शङ्खः
प्रायश्चित्तमुपासीनो वाग्यतस्त्रिरपस्पृशेत् ।
एकवासा आर्द्रवासा भैक्ष्याशी स्थण्डिलेशयः ॥

[यमनियमाः]

797 शङ्खः
नित्यं त्रिषवणस्नायी कृत्वा पर्णकुटीं वने ।
अधःशायी जटाधारी पर्णमूलफलाशनः ॥
ग्रामं विशेच्च भिक्षार्थी स्वकर्म परिकीर्तयन् ।
एककालं समश्नानो वर्षे तु द्वादशे गते ॥

रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः ।
व्रतेनैतेन शुध्यन्ति महापातकिनस्त्विमे ॥

७९८ शङ्खः स्वयं व्रतमभ्युपगम्य चीरवल्कलवासा अधःशायी ।

७९९ शङ्खः वाप्य केशान्नखान्पूर्वं घृतं प्राश्य बहिर्निशि ।
प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत् ॥

८०० शङ्खः स्थानवीरासनी मौनी मौञ्जी दण्डकमण्डलू ।
भैक्ष्यचर्याग्निकार्यं च कूष्माण्डैर्जुहुयाद् घृतम् ॥

८०१ शङ्खः अभुक्त्वा प्रातराहारं ज्ञात्वा चास्य समाहितः ।
सूर्याय देवताभ्यश्च निवेद्य व्रतमाचरेत् ॥

[व्रतनियमाः]

८०२ शङ्खः नित्यं सदायावदायुर्न कदाचिदतिक्रमेत् ।
उपेत्यातिक्रमे दोषश्रुतेरत्यागदर्शनात् ॥
फलश्रुतेर्वीप्सया च तन्नित्यमिति कीर्तितम् ।
तस्मात्कर्तव्यमेवेह प्रायश्चित्तं विशुद्धये ॥

८०३ शङ्खः तस्करश्वापदाकीर्णे बहुव्यालमृगे वने ।
न व्रतं ब्राह्मणः कुर्यात्प्राणबाधाभयात्सदा ॥

804 शङ्ख: सर्वतो जीवितं रक्षेज्जीवन्पापं व्यपोहति ।
व्रतैः कृच्छ्रैस्तथा दानैरित्याह भगवान्यमः ॥

805 शङ्ख: शरीरं धर्मसर्वस्वं रक्षणीयं प्रयत्नतः ।
शरीरात्स्रवते धर्मः पर्वतात्सलिलं यथा ॥

806 शङ्ख: अन्तरा ब्राह्मणं कृत्वा व्रतमेषां समादिशेत् ।
तथा शूद्रं समासाद्य सदा धर्मपुरःसरम् ॥
प्रायश्चित्तं प्रदातव्यं वेदमन्त्रविवर्जितम् ॥

[वपनम्]

807 शङ्ख: गोघ्नः पञ्चगव्याहारः पञ्चविंशतिरात्र[1]मुपवसेत्सशिखं वपनं कृत्वा गोचर्म[2]प्रावृतो गा अनुगच्छेद्[3]गोष्ठे वसेद् गोप्रदानं च[4]

808 शङ्ख: राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः ।
केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेत् ॥

809 शङ्ख: केशानां रक्षणार्थं तु द्विगुणं व्रतमाचरेत् ।
द्विगुणे व्रत आचीर्णे दक्षिणा द्विगुणा भवेत् ॥

810 शङ्ख: विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनम् ।
ऋते महापातकिनो गोहन्तुश्चावकीर्णिनः ॥

[बालस्य न प्रायश्चित्तम्]

8।1 शाङ्खः अतो बालतरस्यास्य नापराधो न पातकम् ।
राजदण्डो न तस्या[1]स्ति प्रायश्चित्तं न विद्यते ॥

8।2 शाङ्खः ऊनैकादशवर्षस्य पञ्चवर्षात्परस्य च ।
प्रायश्चित्तं चरेद्भ्राता पिता वान्यः सुहृज्जनः ॥

[अकामकृतायाः ब्रह्महत्यायाः प्रायश्चित्तम्]

8।3 शाङ्खः अकामकृते ब्रह्महा प[1]रिषदानुमतः खट्वाङ्गी गर्द-
भाजिनी मृण्मयपात्रपतितभिक्षान्नभोजी क[2]पालचिह्न-
ध्वजी स्वकर्मख्यापयंश्चरेद्भैक्षमेककालाहारः शू[3]न्या-
गारपर्वतगुहावृक्षमूलनिकेतनः ।
स एवं द्वा[4]दशे वर्षे शुद्धिमा[5]प्नोति, अन्तरा वा[6] ब्राह्मणं
म[7]रणान्मोचयित्वा गवां वा[8] द्वादशानां परित्राणात्
सद्य एव वा[9]श्वमेधावभृथे स्ना[10]त्वा पूतो भवति ।

[ब्रह्महत्याप्रायश्चित्तम्]

8।4 शाङ्खः ब्राह्मणो ब्राह्मणं घातयित्वा तस्य शिरः कपालमादाय
तीर्थान्यनुचरेदात्मनः पापं संकीर्तयन् द्वादशे वर्षे
शुद्धिमाप्नोति । [अथाश्वमेधं पश्यति] तस्य दर्शनादेव
शुद्धिमाप्नोति ।

815 शङ्खः ब्राह्मणानां भूमिदेवानां नरदेवसमागमे ।
समेत्यावभृथे स्नात्वा ह्यश्वमेधेन शुध्यति ॥

[ब्रह्महत्यासमानां प्रायश्चित्तम्]

816 शङ्खः कौरसाक्ष्यं तथैवोक्त्वा[1] निःक्षेपमपहृत्य च ।
एतदेव व्रतं कुर्याद्धत्वा[2] च शरणागतम् ॥

[द्विजसर्पादिवधे ब्रह्मवधसमानव्रतम्]

817 शङ्खः हत्वा[1] द्विजस्तथा सर्पौ[2] जलेशयबिलेशयौ[3] ।
सप्तरात्रं तथा कुर्याद्व्रतं ब्रह्मवधे[4] तु यत् ॥

[सुरापानप्रायश्चित्तम्]

818 शङ्खः सुवर्णस्तेनः प्रकीर्णकेश आर्द्रवासा[1] आयसं
मुसलमादाय राजानमुपतिष्ठेत् ।

819 शङ्खः सुरापोऽग्नितप्तमस्पृश्यमुदकं पीबेत् स तेन
निर्दग्धकायः शुद्धिमाप्नोति ।

820 शङ्खः असुरामद्यपायी चान्द्रायणं चरेत् ।

[सुरापानगुरुतल्पगमनप्रायश्चित्तम्]

821 शङ्खः अथवा बालचीरवासाः सुरापः खट्वाङ्गी गुरुतल्पगश्च ब्रह्महत्याव्रतमेव चरेयातां तौ तावता कालेन शुद्धिमाप्नुतः ।

[अनृतवचने प्रायश्चित्तम्]

822 शङ्खः आक्रोशानृतवादेषु एकरात्रं त्रिरात्रं चोपवासः ।

[अस्तेयानि]

823 शङ्खः अस्तेयमग्न्ये काष्ठमस्तेयं च तृणं गवे ।
कन्याहरणमस्तेयं यो हरत्यनलङ्कृताम् ॥

[हिरण्यस्तेयप्रायश्चित्तम्]

824 शङ्खलिखितौ हिरण्यस्तेनो मासं गोमूत्रयावकं पिबेत् ।

825 शङ्खः हिरण्यस्तेनः पतितसव्यवहारी मित्रध्रुक् शरणागतघाती प्रतिरूपकवृत्तिः ।

826 शङ्खः यस्य यस्य तु वर्णस्य वृत्तिच्छेदं समाचरेत् ।
तस्य तस्य वधे प्रोक्तं प्रायश्चित्तं समाचरेत् ॥
अपहृत्य तु वर्णानां भूमिं विप्रः प्रसादतः ।
प्रायश्चित्तं वधः प्रोक्तं ब्राह्मणानुमते चरेत् ॥

[5]गजाश्वस्यापहरणे मणीनां रजतस्य च ।
धनापहरणे चैव कुर्यात्संवत्सरव्रतम् ॥
